साधुस्वप्नस्यविरचनाकाचित् दुःस्वप्नस्यनिषेधंध्रुवमूर्ध्वमतोविधास्यामि ४६६ हरणंप्रहरणभूषणमणिमौ-
क्तिकरौप्यकार्थानां धनमानम्लानिकरंदारुणमरणंवदेद्वद्बहुशः ४६७ अपहारोहयवारणयानाशनसदननिव-
सनादीनां नृपशंकाशोककरोबंधुविरोधार्थहानिकरः ४६८ निजभार्याया हरणेवसुनाशःपरिभवेचसंक्लेशः गोत्र
स्त्रीणांचनृणांजायेतांबंधुवधबंधौ ४६९ जायेतयस्यहरणंनिजशयनोपानहांपुनःस्वप्ने तस्यचम्रियेतदयिता-
निबिडास्वशरीरपीडापि ४७० करचरणानांछेदेमातापित्रोर्ध्रुवंवधोभवति अन्यांगावयवानांपुनरात्मजसज्जन
विनाशः ४७१ दंतानांविनिपातोनासाश्रुतिकर्तनंचभवतियस्य दृष्टेराहृतिरपिवाहस्तगतस्तस्यवसुनाशः ४७२
कर्तनमखिलनखानांकूर्चकचानासुरस्तरोम्णाम् स्वप्नेयस्यनियतंकृच्छ्रमतुलंसदाप्नोति ४७३ परितःपतनंप-
श्यतिशिरसःकूर्चस्ययच्छरीरस्य आधिव्याधिपरीतानचिरेणसयातिपंचत्वं ४७४ वल्कलवल्लीरज्जुभिरहिकंचुक
सूत्रतंतुभिःस्वप्ने योवपुषःपरिवेषंकुरुतेतस्यापिमरणंस्यात् ४७५ गृहगोधिकाभुजंगासितपदिकाकीटकाःस्फुरंय-
स्य प्रविशन्तिकर्णरंध्रंसविनश्यतिकर्णरोगेण ४७६ रजनीकरदिनकरयोर्मण्डलभेदोपरागविनिपातान् योवीक्षतेस
कांक्षतिपंचत्वंपंचरात्रेण ४७७ नयनामयःप्रपातेताराग्रहदीपविद्युतांसद्यः आभरणस्ययदंगात्तदंगरोगःस्फुटोभव
ति ४७८ द्वारपरिघस्यशयनप्रक्षालनपादुकानिकेतानां भंजनमपियःपश्यतितस्यापिकलत्रनाशःस्यात् ४७९
छागमृगकरभरासभहुडवेसररोह्यकासरादीनां खुरिणामध्यारोहणवीक्षणरवान्नृणांनशिवाः ४८० अहिनकुल
कोलजंबुककौलेयकवृकतरक्षुऋक्षाणां स्वप्नेवीक्षणविरवणरणानिशिवदूषणानिन्नृणाम् ४८१ शशलोमशमर्क
टिकापिपीलिकामूषकाद्यःपुंसां स्वप्नेदृष्टाःकष्टंनिसरांवितरंतिपादचराः ४८२ चित्रकगण्डकमरुताकबिडाल
कपिसल्लकादयोनशिवाः दृष्टाःस्वरयुद्धकृतःकृच्छ्रंयच्छंतिननुजानान् ४८३ कलविंककाककौशिकखंज

नकपोतठिंककंकाद्या: स्वैर्युद्धकृत:स्वप्नेदृष्टा:कष्टायपुरुषस्य ४८४ पिंगलकपिंजलतित्तिरकृकवाकुश्येनशकुनगृध्राणां युद्धवि
लोकननाद्या: पुंसांक्लेशायतेशतश: ४८५ जलवायसबककंकुभटिट्टिभदात्यूहकुररुहारीता: एतेजलपक्षचरा:दृष्टानसु
खावहा:पुंसां ४८६ पूतरमकराजलकाकुभीरक्रूरकर्मभेकादीन् जलजंतून्य:पश्यतिविहीयतेसधनधान्येन ४८७ प
क्षचराझल्लीकासारघषट्चरणमशकदंशाद्या: नशुभा:कीटमत्कुणयूकाप्रमुखा:स्वपादचरा: ४८८ स्वप्नेजननीयोन्या
मप्यनुचितायांचयोनरोवि पंचाहोरात्राणांनजीवतिनिश्चयपश्चात् ४८९ पाकस्थानेरक्तप्रसूनवितानेप्रसूतिकाभव
ने योविशतिविकृतगात्रोयमपुरयात्रांसविदधाति ४९० य:कूपविवरकंदरगर्तासुतमोवृतासुतिमिरेच विधिवशतो
विशतिपुमान्समस्तविपदांपदंसस्यात् ४९१ भक्षणमोक्षणमाप्ति:पक्कान्नविपक्कमांसयोर्यस्य कथयं.. यंचतस्यप्र
विनाशोवार्थनाशोवा ४९२ शष्कुलिकापूपपालिश्चाणादीनभ्यवहरतिरतोय: बहुशोपिशोकशंकामरणंतातस्यनचिरे
ण ४९३ स्वप्नेहृदयसरस्यांयस्यप्रादुर्भवंतिपद्मानि कुष्ठविनष्टशरीरोयमवसतिंयातिसत्वरितं ४९४ य:श्वपचपिशाचा
द्यै:सार्धंविदधातिसीधुन:पानं मर्त्यै:सत्यंलभतेसदारुणज्वररुजामरणं ४९५ पिबतिचय:स्नेहंवेसहचाण्डालै:प्रमेह
तोम्रियते कृसरंयोभक्षयतिक्षयरोगात्तस्यमृत्यु:स्यात् ४९६ अभितप्तपानीयंसगोमयंसगुडमौषधेनयुतं य:पिबति
सोऽपिनियतंम्रियतेऽतिसाररोगेण ४९७ यस्यजतुधातुकुंकुमसिंदूरंपततिखलुगृहेनभस: गृहदाहस्तस्यभवेच्चौरै:श
स्त्राभिघातोवा ४९८ ताल:कीचकगुल्म:खर्जूरोरोहितद्रुमोविकृत: कण्टकवान्फलहीन:शुष्कोवारक्तपुष्पोवा ४९९ उद
यतिमूर्धनियस्यस्वप्नेऽपिवनस्पति:स्फुटोमूलात् हृदिवागुल्मग्रंथिश्चान्येंगेवातदंगभयं ५०० गिरिगुल्मद्रुमवल्लीवल्मी
कावपुषियस्यजायंते दर्भादीनितृणानिचतस्याप्यंगस्यविनिपात: ५०१ कृष्णंहयमारूढ:कृतकृष्णविलेपनोलुलितकेश:
य:कृष्णपदेगच्छतियाम्यांहिसशाम्यतित्वरितं ५०२ किंशुकमशोकमशनंशाल्मलिवृक्षंचपारिभद्रतरु य:पुष्पितमारु

दः सचिरान्नचिनोमलंकुरुते ५०३ शुष्कतरुदारुवल्लीकीलकवल्मीकगुल्मकंटकितः आरूढोयःस्वप्नेसद्योव्यसनंभवेत्त
स्य ५०४ चत्वरतरुश्मशानंशूलंयूपंशवंसमारूढः चरमातस्यनिशासाज्वलनंतत्रेष्यतेनोचेत् ५०५ सूकरयुक्तानारीभीवाबा
ह्वंतरेप्रकर्षतियम् सातस्यपश्चिमास्यान्निशानचेद्भवतिगिरिशृंगे ५०६ योमानवमारूढंप्रेतयुतंदंष्ट्रिसंयुतंस्वप्ने यस्याभिमुखंग
च्छतिसम्रियतेनिश्चितंनचिरात् ५०७ हसनेशोचनमचिरात्प्रवर्ततेनंदितेऽपिवधबंधः पठनेकलहश्चशृणोत्येतत्प्राज्ञेनविज्ञे
यं ५०८ देशत्यागोरोगोविरेचनेच्छर्दनेपुनर्मूत्रे मरणंवाभवतिनृणांरोदनमपिगायनेनियतं ५०९ योमूत्रयतिस्वप्ने दहनेवा
लोहितंभृशंबहुशः भवतिधनधान्यनाशोमरणंवारणभयंतस्य ५१० सिंहोनागःपुरुषोग्राहःकर्षतियदानरंपद्भ्यां बद्धस्य
सपदिमोक्षोमुक्तस्यचतस्यबंधःस्यात् ५११ पितृतर्पणपरिणयनाद्युत्सवसंवत्सरीयकृत्येषु भोजनमपियःकुरुतेस्यान्म
रणंतस्यनचिरेण ५१२ निवसतिशैलशिलायांश्मशानवेश्मनिचयःपुमान्भुंक्ते निःस्वोभवतिसद्यःशश्वन्मद्येनमाद्यतिवा
५१३ यस्यस्वप्नेरक्तंमाल्यंसूत्रंतथारुणंवसनं बध्येतवपुषियस्मिन्तदंगमपिकृष्यतेतस्य ५१४ योत्यंतपाण्डुरांगव्या
धिंवालिंगनंविकृतवेषं बुध्येतवीक्ष्यपुरुषंतस्यापिस्याद्वपुर्ग्लानिः ५१५ जटिलंमुण्डंभैक्ष्यंमलिनांगंरक्तनीलवस्त्रंवा
स्वप्नेसमीक्षतेयस्तस्यभयंमानहानिश्च ५१६ यःकुसुमितभूमिरुहमारुह्यशिखाग्रमरुणकुसुमानि अवचिनुतेधारयति
चसनिश्चितंमुच्यतेप्राणैः ५१७ वादेकलहेयुद्धेसाधौरिपुभिःपराजयोयस्य निर्भर्त्सनंचबंधादयोऽपितस्याशुभंप्रसभात्
५१८ मधुमक्षिकावसंतिस्वप्नेदिवसेऽथवागृहंयस्य सपरासुराशुनोचेत्कलयतिकल्याणवैकल्यं ५१९ चित्रालिखिता
कारंस्वर्भानुंचंद्रमण्डलानुचिरं योवीक्षतेन्तरिक्षेसदुःसहंदुःखमाप्नोति ५२० संचालनात्कथमपिस्वप्नेस्फुटमिष्टदेवबिंब
स्य यदिभवतिस्वस्थानात्अचिरेणततोऽपिमरणंस्यात् ५२१ यदिपूजनीयदेवप्रतिमांगान्येवकटकटायते नपुनंप्रयांतिभंगं
ततोंगपीडाभवेन्निबिडा ५२२ अंगावयवनिपातःपूजापातोप्यभीष्टदेवस्य यदिजायेतस्वप्नेपरुषंपुरुषस्यतद्दुःखं ५२३

पेशालमकालजातंपुष्पंचफलंचकालजंवापि गर्हितमहितंनियतंपुंसःक्लेशावहंबहुशः ५२४ पतितःस्थलीषुपुरुषःपदवी
मद्वीयसींनजानाति नाशंवालभतेऽभसिसर्वविनश्यतिलयुतोवास्यात् ५२५ योवाद्यंवादयतिस्वप्नेपटहादिकर्परविही-
नः मुंडितकेशःसपुमान्नचिरात्पंचत्वमुपयाति ५२६ रचितरक्तांगरागोरक्तांशुकमाल्यधारिणीरमणी स्वप्नेयदिपरिर
भतेतस्सत्यंब्रह्महत्यास्यात् ५२७ शुष्कांगलतावालाकृतकृष्णाविलेपनाथकृष्णापटा स्वप्नेयद्युपगूहतितद्यमगृहगमन
मासन्नं ५२८ विकरालनेत्रपत्राधृतपीतांबरविलेपनाललना स्वप्नेयद्यालिंगतिभवेत्ततोबहुविधोव्याधिः ५२९ क्षीणोद
रींहसंतींपिंगदृशांदीर्घदंतनखरोमां नग्नामुपगूहतांयःपश्यतितस्यमृत्युःस्यात् ५३० विलुलितकृष्णाकेशीविकृतांगीपिं
गलोचनानग्ना नारीनरंविकर्षतियमदिशिनिश्चमेनसम्रियते ५३१ कज्जलतैलविलिप्तोगतवसनःकरभरासभारूढः
मुक्तलकेशोऽथयदियातियमदिशिसपदितन्मरणम् ५३२ अंधरोहत्येकाकीयोरासभकरभसंयुतंयानं तत्रस्थोजागर्ति
चतत्सत्यंतस्यमृत्युःस्यात् ५३३ मसृणघुसृणागरागोरक्तांशुककुसुममाल्यधारीयः नृत्यतिविहसतिगायतिसम्रियतेर
क्तपित्तेन ५३४ यःस्वप्नेकलुषेऽभसिमग्नोऽसौकष्टतोऽपिनोच्छलति दक्षिणदिशंसकांक्षतिराक्षसदोषेणनचिरेण ५३५
नृत्यन्मर्त्योमत्तोयमदिशिनियतोपरेताद्यैः सत्यंसत्यजतिपुनःप्राणानुन्माददोषेण ५३६ रक्तांगरागमण्डननिवसनपाक्
ष्णाकुस्त्रियासंगः सहताभिःक्रीडावानहितायविगर्हितापुंसः ५३७ स्वप्नेपश्यत्यनिशंदुष्टतरंजाग्रदेवयोमनुजः संवत्स
रपर्यन्तेसत्यमसौमृत्युमाप्नोति ५३८ नियतंहर्षोत्कर्षःपरिणयनाद्युत्सवैस्तथोत्साहः स्वप्नेयस्ययदिस्यात्तन्मरणव्यस
नमासन्नं ५३९ पुंसोमलिनांशुकतादीर्घनखश्मश्रुतादिगंबरता रक्तकषायांबरतानिधनायप्रायशोभवति ५४० अभिस
रणंरमणीनांसुमलीमसवाससांमलिनपुष्पाणां काषायनिवसनानांताभिर्वाकर्षणंनशुभं ५४१ श्वपचपिशाचप्रेतप्रकृति
प्रमदान्वितःस्वप्ने कन्यांचयोऽभिवांछतिसमृत्युमृच्छतिनसंदेहः ५४२ व्यालैर्नखिभिश्चौरैर्बीभत्सैःक्रोष्टुभिर्द्विपैरिपु

भिः विनासनंभवेद्यदितत्सपदिशरीरखेदःस्यात् ५४३ यदिकाककंकशकुनिश्येनाद्यैःपक्षिभिःप्रतिक्षेपः भवतिच्चय-
स्यस्वप्नेतन्मरणंनियतमचिरेण ५४४ शयनासनद्रुमादिप्राकारागारदेवसदनेभ्यः तुरगादिवाहनेभ्यःपतनंध्रुवमात्म
नाशाकरं ५४५ नियतंस्वपितिस्वप्नेयःपांसुषुभूतलेसमुपविशति आकाशेवागच्छतिसविनाशंगच्छतित्वरितं ५४६ सूकर
कुक्कुरवानरमार्जारव्याघ्रजंबुकवृकाद्यैः यस्याकृष्टिर्भवतिसयातिसद्यःकृतांतदृष्टिपथं ५४७ चटनंकुलायकरणंगृध्रध्वां
क्षादिपक्षिभिःशिरसि जायेतयदिस्वप्नेतत्पुंसांप्रायशःक्लेशः ५४८ विकरालपिंगलाक्षीपरिरभतेवानरीनरंप्रसभात् यम
पुरिगन्तुंवांछतितुच्छधनोनियतमचिरेण ५४९ योवाहनमारोहतिवानरमृगमेषमहिषसंयुक्तं क्रीडतिवासहतैरपिब
हुशोनशुभंभवेत्तस्य ५५० स्वप्नेमृतस्ववंश्यैरवश्यमाकारितोमहानितिच योगच्छतिमनुजोयदितन्निधनंतर्हिनचिरेण ५
५१ प्रव्रज्यायाग्रहणंत्यागस्तत्ह्यत्ययोनशुभकारी कलहःसंक्लेशकरःपर्वतभेदश्चपुरुषस्य ५५२ कलहंचधान्यराशेःप
चनंस्नेहेनसर्वभक्षाणां हवनंसधूमवह्नौनियतंतन्मृत्युमावहति ५५३ स्वप्नेरासभशरभैःशुनकवृकक्रोष्टृदंष्ट्रिकरभाद्यैः
नीयेतयोयमदिशंसम्रियतेशोषदोषेण ५५४ विगतवसनस्यपुंसोविडंबितस्वीयतुण्डमण्डस्य श्वपचपिशाचैर्दक्षिणदिशिग
मनंशोभनंनभवेत् ५५५ पुंसोबहुशःकुपितोमातापित्रादिगुरुजनोयस्य निर्भर्त्सनंविधत्तेवित्तेनसमुच्यतेनचिरात्
५५६ भूतप्रेतपिशाचैःश्वपचैःसहसंगतिःपुंसः यमदिश्याकर्षणमपिसभवतिविषदास्पदंनियमात् ५५७ वैरवानसा
दिकानांदिगंबराणांत्रिदण्डसहितानां मंदानांक्षुद्राणांवीक्षणमशिवंकरंस्वप्ने ५५८ यदिकरकोपलवृष्टिर्भूकंपोदेवतानि
हसितंवा इतिनिपातःपतितोनिधनंस्यात्सविधमेवनृणां ५५९ स्वप्नेविनापिसमयंपश्यतिनष्टवृष्टिघनतिमिरं अथवा
सवातवृष्टिंस्पष्टंतस्यापिनशिवंस्यात् ५६० गतदिवसमंददिवसंरजनींरजनीशतारकैर्वियुतां यस्तुमनुष्यःपश्यतिसक्लि
श्यतिनिश्चितंनचिरात् ५६१ चक्रभ्रमणंतैलिककुलालयोरथपलायनंयस्य दोलायांदोलनमपितस्यशरीरस्यखेदःस्यात्

५६२ यस्यस्वप्नेशापोरक्षाभूक्षोदपुंजपंकेषु अध्यासनवीक्षणमपिनसवितथंदवथुमुपयाति ५६३ अधि शेतेपश्यः
तियोवल्मीकावरककंटकप्रकर ध्रुवमध्यास्तेतुनरःसप्राप्नोतिस्फुटंविपदः ५६४ उपलेष्टकादिलोष्टकरवर्परतृणपर्णसं
चयेयस्य शयनाशनेक्षणानिक्षीणधनोनिधनमायाति ५६५ स्वपितिकरीषतुषांजनकंटककचकाष्ठलोहसंहतिषु यःपु
रुषोऽपिनिषीदतिसविंदतेसपदिन्नृपविपदः ५६६ तल्पमृतेशय्यायांयःकाष्ठप्रस्तरोपधानायां विदधातिनरःस्वापंसुप्ता
पंतस्ययमगेहं ५६७ स्वप्नेगोमयकर्दमरक्षोपलचूर्णपांसुरवटिकाभिः विदधातियोऽनुलेपंनियतंसपरासुराशुस्यात् ५६८
जतुधातुरक्तचंदनकुंकुमसिंदूररक्तवर्णानां दर्शनमंगाभ्यंगोलाभोवागर्हितःपुंसाम् ५६९ गोरोचनाहरिद्राहरितालीनी
लिकांजनप्रमुखैः योंगाभ्यंगंकुरुतेसत्वरितंयातियमवसतिं ५७० भक्षणमंगाभ्यंगोमेदोनवनीतमज्जपूतीनां यस्य
स्वप्नेभवतिस्पष्टमनिष्टंभवेत्तस्य ५७१ अंगाभ्यंगंपानंकांजिकमधुघृतकतैलतक्राणां अन्यस्यस्नेहस्यचपुंसामशुभप्र
दंभवति ५७२ शौचिकरजककुविंदकतक्षायस्कारपादुकाकाराः धीवरशबरव्याधादृष्टाःस्फुटमनिष्टदास्तेस्युः ५७३
शौण्डिकमुष्टिककौट्टिकचंडिलचाण्डालकुंभकाराद्याः अन्येऽपिशिल्पिकाराबहुशोपिनशोभनाःपुंसां ५७४ विकलांगपं
गुवामनवैद्यविटद्यूतकारनरचेटाः नशिवकराभृशमन्येपीदृक्षावीक्षिताःस्वप्ने ५७५ हिंतालसालवंजुलवेतसकार्पा
सपनसतिनिशाद्याः एतेसततमसारादृष्टाःस्वप्नेस्फुटमनिष्टाः ५७६ जंबूनिंबकदंबमधूकबंधूकलकुचनिचुलाद्याः दृ-
ष्टाःस्पष्टनेष्टास्तत्कुसुमफलाशनंनशुभं ५७७ अर्जुनबाणबिभीतकरोहितकनककोविदाराद्याः नैवभवंतिपुंसांबहुशः
क्षेमंकरावृक्षाः ५७८ कुटककरंजकुरंटकससद्दलशिलंध्रशेलुशालानां अशनंदर्शनमशिवंफलितानांकुसुमितानांवा
५७९ स्नुहिखदिरशिंशपाधवसर्गकरीरार्ककर्णिकाराणां बदरीपीलुशमीनांदर्शनमशिवंकरंस्वप्ने ५८० प्रियकप्रियंगु
लवशीशोभांजनमदनकांचनाराणां कुसुमफलसंकुलानामवेक्षणंभक्षणंनशिवं ५८१ पादपपल्लवमंजरिफलमज्जांकु

रवल्कलातपत्राणां स्वप्नेप्रत्यवसानंनशोभनंप्रायशः पुंसाम् ५८२ किंपाकादितरूणांनिदिग्धिकाप्रभृत्यौषधीनांवा गुं
जादिबृंहतीनांनशोभनंदर्शननियत ५८३ कुशकाशादितृणानांमूलार्द्रंच सूरणादिकंदानां न्हीबेरादिजरानांदर्शनम
शनंन्नृणांनशिवं ५८४ अरुणकरवीरपंकजंजपाप्रसूनानिवीक्षतेलभते योरक्ताण्यपराण्यपिसविनश्यतिसत्वरंनिय
मात ५८५ कल्पितशाखःशाखीस्फुटमवकेशीक्षुपःपतितपत्रः पूरितकुसुमसमूहः शुभोऽपिनशुभावहोभवति ५८६
जंबीरबुब्बुलबकः कर्कटिकालिंगबृंहणादिफलं यःखादतिपश्यतिवा लभतेवातस्यनशुभंस्यात् ५८७ कर्परबदरीकरी
रकसगरकपरोलपीलुकादिफलं योवीक्ष्यतेथविंदत्यश्नातिचतस्यधननाशः ५८८ सौवर्चलमरिचकणाहरीतकीशुण्ठी
सैंधवादीनां भैषज्यानांभक्षणमवेक्षणंगर्हितंस्वप्ने ५८९ नीवारकोरदूषकमाषश्यामाकचवल्लचणकादीन् भक्षय
तिवीक्षतेयः प्राप्नोतिचतस्यनशुभंस्यात् ५९० व्रीहिप्रियंगुदामलकुष्टतिलतुवरीकुलित्थादीन् यःपश्यत्यथलभतेखा
दतिवातस्यखेदःस्यात् ५९१ लोकेयथाकषायक्षाराम्लकतिक्तकटुरसाप्रकटम् एकाकीनोद्यानात्स्वप्नेप्यशुभास्तथा
ज्ञेयाः ५९२ उत्कृत्यकृत्तिकीकसकपालरदतुण्डनखांत्राणि योभक्षयतिसकांक्षतियमगेहंनेहसंदेहः ५९३ यःख
लखर्जूरीफलगुडगुग्गुलुहिंगुबुकसनिर्यासान् यस्तुस्वप्नेखादतिखेदेनसचीयतेसुचिरं ५९४ अभ्यवहरणंनितरांसर्वबि
जैनीलशैवलादीनां जायेतयस्यसत्यंमृत्युंसत्यजतिनहिपुरुषः ५९५ कथिलकांस्यपित्तलसीसत्रपुताम्रलोहधातू
नि योलभतेपश्यतिवासविनश्यतिधान्यधनहीनः ५९६ करपत्रदात्रमुद्गरकुठारकुद्दालपालकुंताद्याः नेष्टाःस्वप्नेदृष्टा
स्तैस्त्वशुभःस्वाभिघातःस्यात् ५९७ स्थालीमुसलोलूखलसम्मार्जनिकाघरट्टिकादीनां स्पर्शनदर्शनलाभानशुभाय
भवंतिमनुजानां ५९८ इंधननिर्वाणोल्मुकधूमसधूमानलादयः पुंसां दृष्टाःसततमनिष्टधनधान्यहानिम्लानिकराः ५९९
संदंशजालधमनीक्षुरकर्तरीवेधनीवदाराद्याः अन्येऽपिचक्रसूचिप्रमुखानशुभावहाःस्वप्ने ६०० मंथानशूर्पशंखलला

गलयुगपाशरज्जुतोत्राद्याः स्पष्टमनिष्टादृष्टास्तेषांलाभोऽपिनशुभाय ६०१ स्वांगस्यभवतिगिलनंतिमिंगलैर्दलितभूतलेन-
तथा स्वप्नेयदिपुरुषाणांबिभीषणंसपदितद्व्यसनं ६०२ प्रासादप्राकारछत्रध्वजकलशशक्रकेतूनां पातोनृपघातक
रस्तस्यापिसुखावहोनस्यात् ६०३ पतनेपत्तनभंगोदेवायतनस्यराष्ट्रभंगस्तु शैलशिखरस्यनियतंदुःखंपुनरात्मनोऽ
पिस्यात् ६०४ यस्यशरीरेभंगःकंपोमाद्यंप्रतीकहीनत्वं संजायेतस्वप्नेनशोभनंदृश्यतेतस्य ६०५ भिन्नप्रकारसदनं
विमाननौप्रवहणानिपश्यतियः आरोहतिवानियतंतस्यभवेत्सर्वदाखेदः ६०६ पानीयस्यविवृद्धिस्तस्योपरिसंचयो-
भवतियस्य सर्वाभिमुखेदुःखंतस्यस्यात्धान्यधनहानिः ६०७ पश्यतियःस्थलभूमिमकल्पितसलिलसंकुलांस्वप्ने
तस्यव्याधिर्ग्लानिर्धनहानिर्जायतेनित्यं ६०८ स्वप्नमध्येनिशाशेषेकुरुतेदंतधावनं म्लेच्छशत्रोस्तदाघाताल्लक्ष्मीप्राप्तिं
विनिर्दिशेत् ६०९ मलिनानांवनितानांअभिगमनंपांसुलेमहीभागे योविरचयतिस्वप्नेस्यात्तस्यविपत्तिसम्प्राप्तिः ६१०
वहतिस्रोतसिमज्जनमपहारोभवतियस्यपुरुषस्य दुस्तरपंकेमज्जनमपितस्यशरीरनाशःस्यात् ६११ मल्लांककारलीला
युद्धंयोवीक्षतेनरोनियतं तस्यस्थानभ्रंशोबहुशोविपदोऽपिजायन्ते ६१२ अध्ययनविधौविवादश्छात्राणांपरस्परेणने
शस्तः मांगल्योत्सवदर्शनमपिमांगल्यप्रदंनस्यात् ६१३ दूराह्वानंकोलाहलशब्दाकर्णनंचयस्यभवेत् आक्रोशो
निंदावातस्यविनाशोध्रुवंभवति ६१४ आपीडपत्रवल्लीश्रवणोत्तंसकविशेषकादीनां स्वप्नेपश्यतिभंगनशोभनंजाय
तेतस्य ६१५ योदंतानांरागंनयनानामंजनंचविरचयति स्नेहेनशिरोभ्यंगंतस्यासन्नंस्फुटंमरणं ६१६ यमभिद्रव-
तिस्वप्नेशृंगीदंष्ट्रीप्लवंगपत्रीवा राजकुलादातंकःप्रजायतेतस्यमनुजस्य ६१७ स्वप्नेयस्यारिंसातृष्णाबुभुक्षाचजाय
तेबहुशः द्रम्माणांलब्धिर्वानशोभनंस्याद्ध्रुवंतस्य ६१८ निधनंजीवधनानामपहरणंशोभनंनृणांनैव अन्तर्वत्न्याःस्व
प्नेशुभोनगर्भापहारोऽपि ६१९ योधूलीधूसरितोवात्याचक्रेणचुंबिताःककुभः अवलोकयेन्मनुष्यस्तस्यभवेदंतिकेम-

रणं ६२० तद्धिप्रायोनकिंचिच्चराचरं वस्तुपंचभूतेषु नस्वप्नेयदवश्यंप्रदृश्यतेहंतकिंबहुना ६२१ दृष्टाः स्वप्नायेसंप्र
तितेऽत्रशुभाशुभावहास्तस्य येप्रत्यपरंतस्यज्ञेयास्तेस्वस्यकिंचिदपि ६२२ किंबहुनांशुभमशुभंनिमित्तमुक्तंपुरापि
यन्निगमे तस्यापितथास्वप्नेदर्शनमिष्टंह्यनिष्टंवा ६२३ अन्तःस्त्रीपुष्पवतीसद्भिस्तस्यांचमैथुनेवपने स्वप्नेदिनेऽपिचेत्
स्यात्पुण्यजनोतोनरःस्नायात् ६२४ चाण्डालस्पर्शोऽपिस्वप्नेशीघ्रंभयप्रदोराज्ञः गदितानेष्टाःस्वप्नाःप्राचांग्रंथान्विलो
क्ययत्नेन ६२५ इतिश्रीह० बृ० मि० नवमेस्वप्नमार्तंडाध्यायेअशुभस्वप्नफलनिरूपणंनामप्रकरणंतृतीयं ३ अथमिश्रप्र
करणंचतुर्थंप्रारभ्यते अथतत्रादौस्वप्नस्वरूपं पाद्मेभूम्युत्तरे कामोदोवाच महामोहःसमुत्पन्नोह्यकस्मान्मु
निपुंगवः व्यापकःसर्वलोकानांममांगेमतिनाशकः तस्मान्निद्रासमुत्पन्नायथामर्त्येप्रवर्तते ६२६ मयाभयानकंदृष्टंस्वप्नं
वैदारुणंमुने: केनाप्युक्तसमेत्यैवपुरतोमेद्विजोत्तम ६२७ अव्यक्तोयोहृषीकेशःसंसारंसागमिष्यति तदाप्रभृतिदुःखेन
व्याधितास्मिमहामते ६२८ तन्मेत्वंकारणंब्रूहिभवान्ज्ञानवतांवरः नारदउवाच वात्तिकःपैत्तिकश्चैवकफजःसान्निपा
तकः ६२९ स्वप्नःप्रवर्त्ततेभद्रेमानवेषुनसंशयः नाजायतेचदेवेषुस्वप्नोनिद्राचसुंदरि ६३० आदित्योदयवेलायांदृश्य
तेस्वप्नमुत्तमं तत्स्वप्नंमानवानांचपुण्यस्यफलदायकं ६३१ अन्यच्चैवप्रवक्ष्यामिस्वप्नस्यकारणंशुभे महावातोल्बणेचै
ववलत्यायोवरानने ६३२ चलत्यंबुकणाःसूक्ष्मास्तस्मादुदकसंचयात् बहिरेवपतंत्येतेनिर्मलाम्बुकणाःशुभे ६३३
पुनर्लयंप्रयांत्येतेदृश्यादृश्यंभवंतिते तद्वत्स्वप्नस्यवैभावःकथ्यतेशृणुभामिनी ६३४ आत्माशुद्धोनुरक्तस्तुरागद्वेषवि
वर्जितः एवंभूतात्मकानांचमुषित्वेवंमुनिश्चलः ६३५ षड्विंशतिसुतत्वानांमध्येचैषविराजिते शुद्धात्माकेवलोनित्यंप्र
कृतेःसंगतिस्ततः ६३६ तद्भावैर्वायुरूपैश्चलभतेस्थानतोऽपिवा आत्मनस्तेजसश्चैवप्रतितेजःप्रजापते ६३७ अंत
रात्माद्युमन्नामतस्यएवंप्रचक्ष्यते पयसश्चयथामित्राभवत्यंबुकणाःशुभे ६३८ आत्मनस्तुतथातेजअंतरात्माप्रकथ्य

ते सहिपृथ्वीसवैवायु:सवाय्वाकाशएवहि ६३९ सैवतेजश्चदिव्यास्तुएतेषांचपुराकृता: आत्मनस्तेजसो भूत्वा
मलरूपामहात्मन: ६४० तस्यापिसंगतिंप्राप्ताएकत्वंचप्रयातिते आत्मभावप्रदोषेणनाशयंतिवरानने ६४१तेषांक्री
डाविहारोऽयंसृष्टिसंबंधकारणं उदकस्यतरंगस्तुजायतेचविलीयते ६४२ पुनर्भूति:पुनर्हानिस्तथादृश्य:पुन:पुन: आ
पोरूपस्यदृष्टान्तंतद्वदेषांनसंशय: ६४३ आत्मानपश्यतेदेवीतेजोवायुर्नपश्यति नपश्यतोधराकाशौनपश्यंत्यापए
वच ६४४ येचैवआत्मनासार्धंप्रभवंत्यभवंतिच आत्मादयोह्यमीभद्रेनित्यरूपान्नसंशय: ६४५ पिण्डएवप्रणश्येत्
तत्तेषांसंजातएवच विषयाणांसुदोषैश्चरागद्वेषादिभिर्हत: ६४६ प्रणायांयान्तिवैपिण्डायश्चपश्चात्मकाद्विजा: पि
ण्डान्तेवसतेआत्माअतिरूपेस्थितस्यच ६४७ अंतरात्मायथाचास्तिस्फुलिंगस्तुप्रकाशते यथाप्रकाशमायातिदृश्या
दृश्यप्रजायते ६४८ शुद्ध:स्वात्मपरंब्रह्मसदाजागर्तिनित्यश: अंतरात्माप्रबोधस्तुप्रकृतेश्चमहागुणै: ६४९ अनाह्वा
रैस्तुसंतुष्टैरंतरात्मासुखंव्रजेत् सुसुखाज्जायतेनिद्रातामसीलयवर्द्धिनी ६५० नाडिमार्गेणय:सूर्यमेकमुल्लंघ्यगच्छ
ति तदारात्रि:सुप्रजायेतयावन्नोदयतेशशी ६५१ विषयांधकारैर्मुक्तस्तुअंतरात्मासुभावने भावैस्तत्त्वात्मकानां
तुपश्चाद्भावैस्तुप्रेषितै: ६५२ पूर्वजन्मस्थित:पिण्डेअंतरात्माप्रगृह्यते सचपश्यतिवैस्थानमुच्चावचंशुभानने ६५३
संस्मारअंतरात्मावैदोषैर्बद्ध:प्रणीयते तोयंरश्मीतिजीवात्मापश्यंस्तिष्ठतिनित्यश: ६५४ उदात:स्फुरतेतीव्रस्त
स्मात्छब्द:प्रजायते ततोनिद्रामहामायातस्यांगेषुप्रयातिसा ६५५ हृदिकण्ठेतथाचास्येनासिकाग्रेप्रतिष्ठति बा
हुविकुंच्यसंतिष्ठेद्धृतानाभिमण्डलं ६५६ आत्मनस्तुप्रभावाच्चउदानोनाममारुत: प्रजायतेमहातीव्रोबलरोध
करोतिस: ६५७ यथारज्जुप्रबंधस्तुदारुकीलधर:स्थित: तथाचात्मासुसंलग्न:प्राणवायुर्नसंशय: ६५८ अंतरा
साप्रकाशस्तुप्राणवायु:शुभानन: बुद्धिइंद्रोहितोभद्रेअंतरात्माप्रधावति ६५९ पूर्वजन्मार्जितावासान्मत्वासोऽत्र

प्रधावति तत्रसंस्थोमहाप्राज्ञःस्वेच्छयारमतेपुनः ६६० एवंनानाविधान्स्वप्नानंतरात्माप्रपश्यति उत्तमांश्चविरुद्धांश्च
कर्मयुक्तान्वरानने ६१ गिरींस्तथासुदुर्गांश्च बहूनुच्चवचांस्तथा तवदेवांतिकंविद्धि भाव्यंचैववदाम्यहं ६२ प्रभातेदृश्यते-
स्वप्नंमन्यंवाःभ०ग्रमेववा कर्मपुद्भावरारोहेलाभालाभप्रकाशकः ६३ स्वप्नस्यापिअवस्थानंकथितंवरवर्णिनि तद्भाव्यंतुवरा
रोहेविष्णोश्चैवभविष्यति ६४ तन्निमित्तंत्वयादृष्टंदुःस्वप्नंतंतुप्रेक्षितम् सुस्वप्नदर्शनंपुण्यंयदिनीचंनवक्तिच ६५ काश्यपं
दुर्भगंनीचंशत्रुमज्ञानिनंस्त्रियं त्यक्त्वारात्रिंचदिवसेवक्तिविप्रंसुपाण्डितम् ६६ देवालयंचदेवंवाप्यश्वत्थतुलसीवटम् उ-
क्त्वातद्विगुणंपुण्यमपुत्रंलभेत्स्वसः ६७ मोक्षंचपरमैश्वर्यंलभतेसर्ववांछितं वेदेषुसामवेदश्च प्रशस्तःसर्वकर्मसु ६८
६८ तथैवकाण्वशाखायापुण्यकाण्डेमनोहरे स्वप्नाध्यायंनरःश्रुत्वागंगास्नानफलंलभेत् ६९ अथपूर्वोक्ताद्विशेषः स्व
प्नस्तुप्रथमेयामेसंवत्सरफलप्रदः द्वितीयेचाष्टभिर्मासैस्त्रिभिर्मासैस्तृतीयके ६७० चतुर्थेचार्धमासेनस्वप्नःस्वात्मफल
प्रदः दशाहेफलदःस्वप्नोऽप्यरुणोदयदर्शने ७१ प्रातःस्वप्नश्चफलदस्तत्क्षणंयदिबोधतः चिन्ताव्याधिसमायुक्तोनरः-
स्वप्नंचपश्यति ७२ तत्सर्वंनिष्फलंतातभयात्येवनसंशयः ७३ पुराणान्तरे दुःस्वप्नेदुर्निमित्तेचमहाशान्तिंप्रकल्पयेत्
महाशांतिः मयासंहितास्कंधेएकोनत्रिंशदुत्तरशततमेध्यायेप्रतिपादितातत्रविज्ञेया ७४ कृष्णजन्मखण्डे रक्तचं
दनकाष्ठानिघृताक्तानिजुहोतियः गायत्र्याश्चसहस्रेणतेनशांतिर्विधीयते ७५ सहस्रधाजपेद्योहिमत्स्येनंमधुसूदनम्
निष्पापोहिभवेत्सोहिदुःस्वप्नःसुखवान्भवेत् ७६ अच्युतंकेशवंविष्णुंहरिंसत्यंजनार्दनम् हंसंनारायणंचैवह्येतन्नामा
ष्टकंशुभम् ७७ शुचिःपूर्वमुखःप्राज्ञोदशकृत्वश्चयोजपेत् निष्पापोऽपिभवेत्सोपिदुःस्वप्नःशुभवान्भवेत् ७८ विष्णुंना
रायणंकृष्णंमाधवंमधुसूदनं हरिंनरहरिंरामंगोविंदंदधिवामनं ७९ भक्त्याचेमानिनामानिदशभद्राणियोजपेत् शतकृ
त्वोभक्तियुक्तोजस्थानीरोगतांव्रजेत् ८० लक्षधाहिजपेद्योहिबंधनान्मुच्यतेध्रुवम् जह्याबदशलक्षंचमहावंध्याप्रसूयते

६८१ हविष्याशीयतःशुद्धोदरिद्रोधनवान्भवेत् शतलक्षंचजप्त्वाचजीवन्मुक्तोभवेन्नरः ८२ ॐनमःशिवंदुर्गांगणपतिं
कार्त्तिकेयंदिनेश्वरम् धर्मंगंगांचतुलसींराधांलक्ष्मींसरस्वतीम् ८३ नामान्येतानिभद्राणिजलेस्नात्वाचयोजपेत् वांछितं
चलभेत्सोपिदुःस्वप्नः शुभवान्भवेत् ८४ ॐह्रींश्रींक्लींपूर्वदुर्गतिनाशिन्यैमहामायायैस्वाहा ८५ कल्पवृक्षोहिलोका
नांमंत्रःसप्तदशाक्षरः शुचिश्चदशधाजप्त्वादुःस्वप्नः सुखवान्भवेत् ८६ शतलक्षजपेनैवमंत्रसिद्धिर्भवेन्नृणाम् सिद्धम
न्त्रस्तुलभतेसर्वांसिद्धिंचवांछिताम् ८७ ॐनमोमृत्युंजयायेतिस्वाहान्तंलक्षधा दृष्ट्वाचमरणंस्वप्नेशतायुश्चभवेन्नरः
८८ पूर्वोत्तरमुखोभूत्वास्वप्नंप्राज्ञेप्रकाशयेत् काश्यपेदुर्गतेनीचेदेवब्राह्मणनिंदके ८९ मूर्खेचैवानभिज्ञेचनचस्वप्नंप्र
काशयेत् अश्वत्थेगणकेविप्रेपितृदेवासनेषुच ६९० आर्येचवैष्णवेमित्रेदिवास्वप्नंप्रकाशयेत् इतितेपुण्यमाख्यातंकथि
तंपापनाशनम् ९१ धनंयशास्यमायुष्यंकिंभूयःश्रोतुमिच्छसि ९२ अथान्यच्चविशेषः स्वप्नानथप्रवक्ष्यामिमरणाय
शुभायच सुहृदोयांश्चपश्यंतिव्याधितोवास्वयंतथा ९३ तत्रपंचविधंपूर्वमफलंभिषगादिशेत् दिवास्वप्नमतिह्रस्वमति
दीर्घंचबुद्धिमान् ९४ मनोवहानांपूर्णत्वाद्दोषैरतिबलैस्त्रिभिः स्रोतसांदारुणान्स्वप्नान्कालेपश्यत्यदारुणान् ९५नातिप्र
सुप्तःपुरुषःसफलानफलानपि इन्द्रियेशेनमनसास्वप्नान्पश्यत्यनेकधा ९६ सर्वेन्द्रियाण्युपरतोमनोह्युपरतंतथा विष
येभ्यस्तदास्वप्नंनानारूपंप्रपश्यति ९७ अथरोगभाविस्वप्नाः श्वभिरुष्ट्रैःखरैर्वापियातियोदक्षिणांदिशं स्वप्नेयस्मा-
तमाविश्यनजीवन्नवसृज्यते ९८ अथरक्तपित्तसंभवे लाक्षारक्तांबराभंयःपश्यत्यंबरमंतिकात् सरक्तपित्तमा
साद्यतेनैवांतायनीयते ९९ अथरक्तरोगे रक्तस्रग्रक्तसर्वांगोरसवासामुहुर्हसन् यःस्वप्नेह्रियतेनार्यासससक्तंमाप्य
सीदति ७०० अथगुल्मरोगे शूलाटोपांत्रकूटाश्चदौर्बल्यंचातिमात्रया नखादिषुचवैवर्ण्यंगुल्मेनांतकरोनरः १ लता
कंठकिनीयस्यदारुणाहृदिजायते स्वप्नेगुल्मस्तमंतायक्रूरोविशतिमानवं २ अथकुष्ठरोगे कायेऽल्पमपिसंस्पृष्टं-

सुभृशंयस्यदृीयते क्षतानिचनरोहंति कुष्ठैर्मृत्युर्हिनास्तितं ३ नग्नस्याज्यावसिक्तस्यजुह्वतोऽग्निमनर्चिषं पद्मान्युर-
सिजायंतेस्वप्नेकुष्ठैर्मरिष्यतः ४ अथप्रमेहरोगे स्नातानुलिप्तगात्रेऽपियास्मिन्नरध्यंतिमाक्षिकाः सप्रमेहेणसंस्पर्शप्र
प्यतेनैवहन्यते ५ स्नेहंबहुविधंस्वप्नेचाण्डालैःसहयःपिबेत् बध्यतेसप्रमेहेणस्पृश्यतेंतायमाध्रवः ६ अथोन्मादरोगे
ध्यानायामस्तथोद्वेगोव्याहश्चस्थानसंभवः अरतिर्बलहानिश्चमृत्युरुन्मादपूर्वकः ७ आहारद्वेषिणंपश्यतप्लुतचित्तंमु
दर्दितं विद्याद्धीनोमुमूर्षन्तंउन्मादेनातिपातिनः ८ क्रोधनंत्रासबहुलंहंत्युन्मादःशरीरिणं नृत्यंरक्षोगणैःसाकंयःस्व-
प्नेऽभसिसीदति ९ सप्राप्यभृशमुन्मादंयातिलोकमतःपरम् अथापस्माररोगे असत्तमःपश्यतियःशृणोत्यप्यसतः
स्वरान् ७१० बहून्बहुविधान्जाग्रत्सोपस्मारेणबध्यते मत्तंनृत्यंतमाविध्यप्रेतोहरतियंनरं ११ स्वप्नेहरतितंमृत्युर
पस्मारपुरःसरः अथबहिरायामरोगे बादिरोगे स्तम्भेतेप्रतिबुद्धस्यहनूमध्येतथाक्षिणी १२ यस्यतंबहिरायामोगृ
हित्वाहंत्यसंशयं अथमृत्युकाले शष्कुलीरप्यपूपान्वैस्वप्नेखादतियोनरः१३सचेत्ताद्दृक्छर्दयतिप्रतिबुद्धोनजीवति
अथानेकरोगस्वप्नाः ज्वरितानांशुनासख्यंकपिसख्यंतुशोषिणां १४ उन्मादेराक्षसैःप्रेतैरपस्मारेप्रवर्त्तनम् मेहातिसा
रिणांतोयपानंस्नेहस्यकुष्ठिनां १५ गुल्मेषुस्थावरोत्पत्तिःकोष्ठेमूर्ध्निशिरोरुजि शष्कुलीभक्षणंछर्द्यामध्वाश्वासपि-
पासयोः १६ हारिद्रंभोजनंवापियस्यस्यात्पाण्डुरोगिणः रक्तपित्तिपिबेद्यश्चशोणितंसविनश्यति १७ एतानिपूर्वरूपा
णियःसम्यगवबुध्यते सएषामनुबंधंचफलंचज्ञातुमर्हति १८ इमांश्चाप्यपरान्स्वप्नान्दारुणानुपलक्षयेत् व्याधितानां
विनाशायक्लेशायमहतेऽपिवा १९ इतिरोगस्वप्नाः स्वप्नेतुमदिरापानंवसामांसस्यभक्षणे कृमिविष्टानुलेपंचरुधिरेणा-
भिषेचनं ७२० भोजनंदधिभक्तस्यश्वेतवस्त्रानुलेपनं रत्नान्याभरणादीनिस्वप्नेदृष्ट्वाप्रसिध्यति २१ देवविप्रद्विजछत्रतु
षपंकजपार्थिवान् शुक्लपुष्पाम्बरधरांप्रशस्ताभरणांगनां २२ वृषभंपर्वतंक्षीरफलवृक्षाधिरोहणं दर्पणामिषमाल्यासिस्त


रणंचमहांभसां २३ दृष्ट्वास्वप्नेऽर्थलाभःस्याद्व्याधिमुक्तिश्चजायते यूपकिंशुकवाल्मीकपारिभद्रादिरोहणं २४ तैल-
कार्पासिपिण्याकलोहावाप्तिर्विपत्तये विदारकरणंस्वप्नेरक्तवस्त्रविधारणं २५ स्त्रोतसांहरणंनेष्टंपक्कमांसस्यभोजनं
आदित्यमण्डलंस्वप्नेचन्द्रंवायदिपश्यति २६ व्याधितोमुच्यतेरोगाद्रोगीश्रियमाप्नुयात् रुधिरंपिबतिस्वप्नेसुरांवापित
थानरः २७ ब्राह्मणीलभतेविद्यामित्तरोलभतेधनं पादुकोपानहोछत्रंलब्ध्वायःप्रतिबुध्यति २८ नासिंवानिर्मलंतीक्ष्णं
साध्वन्नंतस्यनिर्दिशेत् अग्निनावेष्टितोयोवैनगरेपिगृहेपिवा २९ गृहेमाण्डलिकोराजानगरेपार्थिवोभवेत् आदित्यंवा
थचन्द्रंवाविगतच्छविकंतथा ७३० पततंचाथनक्षत्रंतारकादींश्चवायदि वीक्षतेमानवःस्वप्नेमरणंशोकमाप्नुयात् ३१
अशोकंकरवीरंवापलाशंवाथपुष्पितं स्वप्नान्तेयस्तुपश्येत्तन्नरःशोकमवाप्नुयात् ३२ केशायस्यावशीर्यन्तेयदिदन्ताः
पतन्तिवा अर्थनाशोभवेत्तस्यपुत्रोवायदिनश्यते ३३ खरोष्ट्रमाहिषरथमेकाकीयःप्ररोहति तत्रस्थःसतुबुध्येतमृत्युंशी-
घ्रमवाप्नुयात् ३४ कर्णनासाकरादीनांछेदनंपंकमज्जनं पतनंदन्तकेशानांपक्कमांसस्यभक्षणं ३५ खरोष्ट्रमाहिषंयानं
तैलाभ्यंगंचमृत्यवे ३६ वराहः हरिणारोहेभ्रमणंमृत्युर्नचिरेणसूकरारोहे उष्ट्रारोहेव्याधिवृद्धिःस्यात्कुञ्जरारोहे ३७
दन्तायस्यविशीर्यन्तेकेशायस्यपतान्तिच धननाशोभवेत्तस्यव्याधिपीडाप्यसंशयम् ३८ अभिद्रवंतियंस्वप्नेश्रृंगिणो
दंष्ट्रिणोथवा वानरावावराहावातस्यराजकुलाद्भयं ३९ स्वप्नेभ्यक्तस्तुरजसापयसाचघृतेनच स्नेहेनवातथान्येनव्याधिं
तस्यैविनिर्दिशेत् ७४० कृष्णांबरधरानारीकृष्णराधानुलेपना अवगूहतियंस्वप्नेकल्याणंतस्यनिर्दिशेत् ४१ स्वप्नेषुनग्ना
न्मुण्डांश्चरक्तकृष्णांबरावृतान् व्यंगांश्चविकृतान्कृष्णान्सपाशान्सायुधानपि ४२ बध्नतोनिघ्नतश्चापिदक्षिणांदिश-
माश्रितान् महिषोष्ट्रखरारूढान्स्त्रीपुंसोर्यस्तुपश्यति ४३ सस्वस्थोलभतेव्याधिंरोगीयात्येवपंचतां अधोयोनिंपतत्यु
च्चाज्जलेभीवाविलीयते ४४ श्वापदैर्हन्यतेयोपिमत्स्याद्यैर्गिलितोभवेत् यस्यनेत्रेविलीयेतेदीपोनिर्वाणतांव्रजेत् ४५

तैलंसुरांपिबेद्वापिलोहंवालभतेतिलान् पक्कान्नंलभतेभ्रातिविरोल्कुपंरसातलं ४६ सस्वस्थोलभतेव्याधिंरोगीयात्ये
वपञ्चतां ४७ यस्योत्तमांगेजायन्तेवंशागुल्मलतादयः वयांसिचविलीयन्तेस्वप्नेमौण्ड्यमियाच्चयः ४८ गृध्रोलूककश्वका
काद्यैः स्वप्नेयःपरिवार्यते रक्षःप्रेतपिशाचस्त्रीचाण्डालद्रमडादिकैः ४९ वंशवेत्रलतापाशतृणकण्टकसंकटे प्रमु
ह्यन्तिहियःस्वप्नेलगतिप्रपतत्यपि ७५० भूमौपांसूपधानायांवल्मीकेवाथभस्मनि कलुषेम्भसिपंकेनाकूपेवातमसा
वृते ७५१ स्वप्नेमज्जतिशीघ्रेणस्रोतसाह्रियतेथ्वयः स्नेहपानंतथाभ्यंगप्रच्छर्दनविरेचने ५२ हिरण्यलाभःकलहः
स्वप्नेबन्धपराजयौ उपानद्युगनाशश्चप्रपातःपांसुचर्मणोः ५३ हर्षस्वप्नेप्रकुपितैःपितृभिश्चावभर्त्सनम् दन्तचन्द्रा
र्कनक्षत्रदेवतादीपचक्षुषाम् ५४ पतनंवाविनाशोवास्वप्नेभेदोनगस्यवा रक्तपुष्पंवनंभूमिंपापकर्मालयांचिताम् ५
५ गुहान्धकारंसंबाधंस्वप्नेयःप्रविश्यत्यपि रक्तमालीहसन्नुच्चैर्दिग्वासादक्षिणांदिशम् ५६ दारुणामटवींस्वप्नेक
पियुक्तेनयातिवा कषायिणामसौम्यानांनग्नानांदण्डधारिणां ५७ कृष्णानांरक्तनेत्राणांस्वप्नेनेच्छतिदर्शनम् कृष्णापा
पानिराचारादीर्घकेशनखस्तनी ५८ विरागमाल्यवसनास्वप्नेकालनिशामता इत्येतेदारुणाःस्वप्नारोगीयैर्यातिपं
चताम् ५९ अरोगःसंशयंगत्वाकश्चिदेवविमुच्यते तथाचसुश्रुते स्नेहाभ्यक्तशरीरस्तुकरभव्यालगर्दभैः ७६०
वराहैर्महिषैर्वापियोयायाद्दक्षिणामुखः रक्ताम्बरधराकृष्णाहसन्तीमुक्तमूर्धजा ६१ यंवाकर्षतिबद्धास्त्रीन्नृत्यन्तीद
क्षिणामुखम् अन्त्यावसायिभिर्योवाकृष्यतेदक्षिणामुखः ६२ परिष्वजेरन्यंवापिप्रेताःप्रव्राजितास्तथा मूर्धन्या
घ्रायतेयस्तुश्वापदैर्विकृताननैः ६३ पिबेन्मधुचतैलंचयोवापंकेऽवसीदति प्राङ्प्रदिग्धगात्रोवाप्रनृत्येत्प्रहसेत्तथा
६४ निरम्बरश्चयोरक्तांधारयेच्छिरसिस्रजम् यस्यवंशनलोवापितालोवोरसिजायते ६५ यं वामत्स्योग्रसेद्योवाज
ननींप्रविशेन्नरः पर्वताग्रात्पतेद्योवाश्वभ्रेवातमसावृते ६६ ह्रियतेस्रोतसायोवायोवामौढ्यमवाप्नुयात् पराजी

पेतबध्येतकाकाद्यैर्वाभिभूयते ६७ यःपश्येद्देवतानांवाप्रकम्पमवनेस्तथा शाल्मलीकिंशुकंयूपंवल्मीकंपारिभद्रकम् ६८ पुष्पिताढ्यं
कोविदारंवाचितांयोवाधिरोहति कार्पासतैलपिण्याकलोहानिलवणंतिलान् ६९ लभेताश्नातिवापक्वमन्नंयश्चापिबेत्सुराम् स्वस्थः
सलभतेव्याधिंव्याधितोमृत्युमृच्छति ७'७० विष्णुपुराणे देवद्विजादिभूपानांप्रजानांक्रोधएवच आलिंगनंकुमारीणांप्राणिनां
चैवमैथुनं ७१ हानिश्चैवस्वगात्राणांवीरकंठमनःप्रियान् दक्षिणाशाभिगमनंव्याधिनाभिभवस्तथा ७२ फलापहारश्चतथा-
शाङ्कुलानांविशोधनं काषायवस्त्रधारित्वंतद्वत्क्रीडनकेतथा ७३ स्नेहपानावगाहौचरक्तमाल्यानुलेपनम् एवमादीनिचान्या
निदुःस्वप्नानिविनिर्दिशेत् ७४ चरके अकल्याणमपिस्वप्नंदृष्ट्वातत्रैवयःपुनः पश्येत्सौम्यंशुभाकारंतस्यविद्याच्छुभंफलं ७
५ अथशुभस्वप्नानाह अतऊर्ध्वंप्रवक्ष्यामिप्रशस्तस्वप्नदर्शनम् देवाद्विजान्गोवृषभान्जीवतःसुहृदोनृपान् ७६ समिद्धमग्निंवि
प्रांश्चनिर्मलानिजलानिच पश्येत्कल्याणलाभायव्याधेरपगमायच ७७ मांसंमत्स्यान्स्रजःश्वेतावासांसिचफलानिच लभतेध
नलाभायव्याधेरपगमायच ७८ महाप्रसादसफलवृक्षवारणपर्वतान् आरोहेद्द्रव्यलाभायव्याधेरपगमायच ७९ नदीनदसमुद्रांश्च
क्षुभितान्कलुशोदकान् तरेत्कल्याणलाभायव्याधेरपगमायच ७८० उरगोवाजलौकावाभ्रमरोवापियंदशेत् आरोग्यंनिर्दिशेत्तस्य-
धनलाभंचबुद्धिमान् ८१ एवंरूपान्शुभान्स्वप्नान्यःपश्येद्व्याधितोनरः सदीर्घायुरितिज्ञेयस्तस्मैकर्मसमाचरेत् ८२ ग्रहनक्षत्रतारा
णांचन्द्रमण्डलदर्शनं भास्करोदयनंचैवप्रज्वलन्तंहुताशनं ८३ हर्म्येष्वारोहणंचैवप्रासादशिरसोपिवा एवमादीनिसंदृष्ट्वानरः
सिद्धिमवाप्नुयात् ८४ आचारमयूखे आरोहणंगोवृषकुंजराणांप्रासादशैलाग्रवनस्पतीनाम् विष्ठानुलेपोरुदितंमृतंचस्वप्नेष्वग-
म्यागमनंप्रशस्तम् ८५ क्षीरिणंफलिनंवृक्षमेकाकीयःप्ररोहति तत्रस्थःसविबुध्येतधनंशीघ्रमवाप्नुयात् ८६ यस्यश्वेतेनसर्पेणग्र
स्तेश्चेद्दक्षिणःकरः सहस्रलाभस्तस्यस्यादपूर्णेदशमेदिने ८७ उरगोवृश्चिकोवापिजलौग्रसतियंनरम् विजयंचार्थसिद्धिंचपुत्रंतस्य
विनिर्दिशेत् ८८ प्रासादस्थस्तुयोभुंक्तेयोवातरतिसागरं अपिदासकुलेजातःसराजानियतंभवेत् ८९ यस्तुमध्येतडागस्यभुंक्तेच-

घृतपायसम् अखण्डेपुष्करेपुत्रेतंविद्यात्पृथिवीपतिम् ७९० बलाकांकुक्कुटींक्रौंचींदृष्ट्वायः प्रतिबुध्यति कुलजांलभतेचान्यांभा-
र्यांचप्रियवादिनीं ९१ नागपत्रंलभेत्स्वप्नेकर्पूरमगरंतथा चन्दनंपाण्डुरंपुष्पंतस्यश्रीःसर्वतोमुखी ९२ क्षीरंपिबतियःस्वप्नेसफेनंदो-
हनंकृते सोमपानंभवेत्तस्यभोक्ताभोगाननेकशः ९३ दधिदृष्ट्वाभवेत्प्रीतिर्गोधूमांश्चधनागमः यवान्यज्ञागमंविद्याल्लोभःसिद्धार्थ
कानपि ९४ रथंगोवृषसंयुक्तमेकाकीयःप्ररोहति तत्रस्थःसविबुध्येतधनंशीघ्रमवाप्नुयात् ९५ दधिलाभेभवेदर्थोघृतलाभेध्रुवंयशः
घृतंभक्षेत्ध्रुवंक्लेशोयशस्तुदधिभक्षणे ९६ बृहस्पतिः मानुषस्यतुमांसानियस्तुस्वप्नेपुभक्षयेत् अपक्कान्येवसर्वाणिशृणुत
स्यतुयत्फलम् ९७ पादेपञ्चशतंलाभःसहस्रंबाहुभक्षणे मस्तकाशनतोराज्यंमंत्रिताहृदयाशनात् ९८ उपानहौध्वजंचक्रं
लब्ध्वायस्तुनिबध्यते असिंवानिर्मलांतीक्ष्णामध्वानंतस्यनिर्दिशेत् ९९ नावमारोहयेद्यस्तुनदींवाविपुलांतरेत् प्रवासंनियतंत
स्यशीघ्रमागमनंपुनः ८०० पीताम्बरधरानारीपीतमाल्यानुलेपना अवगूहतियंस्वप्नेकल्याणंलभतेहिसः १ श्वेताम्बरधरानारी
श्वेतमाल्यानुलेपना अवगूहतियंस्वप्नेतस्यश्रीःसर्वतोमुखी २ सर्वाणिशुक्लान्यतिशोभनानिकार्पासभस्मोदनतक्रवर्ज्यम् सर्वा
णिकृष्णान्यतिनिंदितानिगोहस्तिदेवद्विजवाजिवर्ज्यम् ३ देवाद्विजास्तथागावःपितरोलिंगिनोनृपाः यद्वदन्तिनरंस्वप्नेतत्तथैवभवेत्
ध्रुवम् ४ आसनेशयनेयानेशरीरेवाहनेऽपिवा ज्वलमानेविबुध्येततस्यश्रीःसर्वतोमुखी ५ वडवांकुक्कुटींदोलांलब्ध्वायस्तुविबुध्यते
सकामांलभतेभार्यांसुभगांप्रियवादिनीं ६ निगडैर्बध्यतेयस्तुपाशैर्वाबध्यतेभृशम् सुपुत्रोजायतेतस्यसुप्रतिष्ठांचविंदति ७ अ
थनिष्फलस्वप्नं यथास्वंप्रकृतिस्वप्नोविस्मृतोविहतश्चयः चिन्ताकृतोदिवादृष्टोभवन्त्यफलदास्तुते ८ आयुस्तृतीयभागेशेषे
पतितःप्रकीर्त्तितः स्वप्नः अतिहास्यशोकोकोपोत्साहजुगुप्साभयाद्गुणोत्पन्नः ९ वितथःक्षुधापिपासामूत्रपुरीषोद्भवःस्वप्नः
अथप्रकृतिजन्यस्वप्न वाताधिकेऽभ्रंभ्रमतिर्विपश्येत्कृष्णानिवर्णानिप्रचण्डवातम् पित्ताधिकेकाञ्चनरत्नमाल्यदिवाकराग्नि
ज्वलनानिपश्येत् ८१० श्लेष्माधिकश्चन्द्रभशुक्लपुष्पसरित्सरोम्भोनिधिलंघनानि कालेमरुत्पित्तकफप्रकोपंसाधारणंस्याद्वि

सन्निपातात् ११ अथमंत्रसाधनं ॐघेंटंस्वाहा जप ५०००० घीनोदिवोजपतगराखवो धूपकरवो मंत्रसिंदूरथी समोरभी
तउपरलखवो चाररस्तानी माटिलावीने तेनु आसनकरीने तेउपरबेसीजपकरवो देवताप्रत्यक्ष आवसे अथस्वप्नेश्वरीविधानं
प्रणवःकमलास्वप्नेश्वरीकार्यंचमेवद स्वाहात्रयोदशोवर्णोयंमंत्रोमुन्यादिपूर्ववत् १२ ॐकमलाश्रीस्वप्नेश्वरीकार्यमेवदस्वाहा स्वरू
पं ॐश्रीस्वप्नेश्वरीकार्यमेवदस्वाहा इतिमंत्रेणप्राणायामत्रयंकृत्वा ॐपिप्पलाऋषयेनमःशिरसि निवृच्छंदसेनमः मुखे श्री
स्वप्नेश्वरीदेवतायैनमः हृदये ममश्रीस्वप्नेश्वरीमंत्रसिद्धये जपेविनियोगः।अंगुष्ठयोः ॐश्रींहृदयायनमः।तर्जन्योः स्वप्नेश्वरि
शिरसेस्वाहा।मध्यमयोः कार्यं शिखायैवषट्।अनामिकयोः मे कवचायहुं। कनिष्ठयोः वद नेत्रत्रयायवौषट्। करतलयोः स्वा
हा अस्त्रायफट् । हृदयादिषडंगेष्वपिन्यसेत् ॥ अथध्यानं ॥ वराभयेपद्मयुगंदधानांकरैश्चतुर्भिः कनकासनस्थां सिताम्बरांश
शारदचन्द्रकांतिंस्वप्नेश्वरींनौमिविभूषणाढ्यां १३ इतिध्यात्वा बिल्वपत्रैर्जुहुयाद्दशांशतः अथपूजाप्रयोगः ॐमूलेनस्वासन
मास्तीर्य पीठादौयंत्रंप्रतिष्ठाप्य सकर्णिकेअष्टदलकमलं एकरेखात्मकचतुर्द्वारसाहितं चतुरस्रं काश्मी
रचंदनादिनाताम्रादिपात्रेसंलिख्यपूजांकुर्यात् तत्रअष्टदलपूजा कामदायैनमः मानदायैनमः नक्ता
यैनमः मधुरायैनमः नर्मदायैनमः भोगदायैनमः प्राणदायैनमः इतिअष्टदले मध्येमूलेनपुष्पांजलिं
दत्वापुनरष्टदलेषु नन्दायैनमः१ चन्द्रकान्त्यैनमः२ हासायैनमः३ सुलायैनमः४ मदविह्वलायैनमः



५ अमोदायैनमः६ प्रमोदायैनमः७ वसुदायैनमः८ अष्टदलेतदुपरि इन्द्राय. वज्राय.१ अग्नये शक्त्यैन.२ यमाय.दण्डाय.
३ नैर्ऋतये.खड्गाय.४ वरुणाय.पाशाय.५ वायवे.अंकुशाय.६ सोमाय.गदायै.७ ईशानाय.त्रिशूलाय.८ पुनर्मध्येपुष्पांजलिं
दत्वाततःषडंगंकृत्वारात्रौसम्पूज्यदेवेशीमयुतंपुरतोजपेत् शयीतब्रह्मचर्येणभूमौदर्भस्थितासने देव्यैनिवेद्यस्वंकार्यं सास्वप्ने
वदतिध्रुवं १४ इतिविधानं अथकर्णपिशाचिनीमन्त्रः ॐनमोजिणाणं लोगुत्तमाणं लोगनहाणं लोकहियाणं लोगपईवा-

णं रोगपज्जोयगराणं ममकर्णेशुभाशुभं कथय२ कर्णपिशाचिनी नमः साधनविधि मंत्रजपतानमः केहेणा होमकरता स्वाहा कहेणा
१२००० गुणण १२०० आहुती देणी पंचमेवो घृतसंयुक्त होम जापरूग दीपक अखण्ड घृतको राखणो पवित्रवस्त्रराखणा जापकरति
वखत मौन्यराखणी कार्य वेळा केसर चंदन अत्तर जीमणा हाथने लगाडि कानने लगावि भुमि सुवणो गुणे जिते एकासणो करणो दि
न २१ धरतिशयन अथदुःस्वप्नशान्तिः दुःस्वप्नान्येवमादीनि दृष्ट्वाश्रयान्नकस्यचित् स्नानं कुर्याद्दुषस्येवद्द्याद्धेमतिलादयः १५
पठेत्स्तोत्राणिदेवानांरात्रौदेवाळयेवसेत् कृत्वैवंत्रिदिनं मर्त्योदुःस्वप्नात्परिमुच्यते १६ स्तुतिश्चवासुदेवस्यतथातस्यचपूजनं नागेन्द्र
मोक्षश्रवणंज्ञेयंदुःस्वप्ननाशनं १७ सुश्रुते स्वप्नानेवंविधान्दृष्ट्वाप्रातरुत्थाययत्नवान् दद्यान्माषांस्तिलांल्लोहंविप्रेभ्यः कांचनंतथा
१८ जपेच्चापिशुभान्मन्त्रान्गायत्रींत्रिपदांतथा दृष्ट्वाचप्रथमेयामेसुप्याध्यात्वापुनःशुभम् १९ जपेद्वान्यतमं देवं ब्रह्मचारीसमाहितः
नचाचक्षीतकस्मैचित्दृष्ट्वास्वप्नमशोभनं ८२० देवतायतनेचैववसेद्रात्रित्रयंतथा विप्रांश्चपूजयेन्नित्यंदुःस्वप्नात्परिमुच्यते २१ आ
चारमयूखे एवमादीनिचान्यानिश्रुत्युक्तानिबहूनिच स्वप्नोत्पातादिचैतेशांकालरात्र्यादिदेवताः २२ पूजाविधानंपूर्वोक्तंकुर्याद
त्रापियत्नतः पूर्वोक्तमितिरात्रिसूक्तवदित्यर्थः २३ रात्रिसूक्तकल्पश्चग्रन्थगौरवभयान्नलिखितः रात्रिसूक्तंसमंत्रप्रयोगः म
या बृहज्ज्योतिषार्णवसंहितास्कंधेसूतिकाध्यायेप्रतिपादितः २४ किंच होमं कृत्वाप्रयत्नेनरात्रावेबद्विजोत्तमः उक्तेनैवविधाने
नसघृतंपायसंहुनेत् २५ उक्तेनैवविधानेनेतिस्वगृह्योक्तविधानेनेत्यर्थः प्रत्येकंपायसंहुत्वारात्रिव्याख्यानतिक्रमात् २६ अ
ष्टोत्तरशतंहुत्वासूक्तेनानेनवित्तमः स्वप्नाधिपतिमंत्रेणहुनेदष्टोत्तरंशतं २७ स्वप्नाधिपतिमन्त्रेणकालरात्रिनाममंत्रेणेत्यर्थः
ततः स्विष्टकृतंहुत्वाहोमशेषंसमापयेत् पूर्वोक्तमभिषेकाद्यतदत्रापिविधीयते २८ पूर्वोक्तग्रहयज्ञोक्तमित्यर्थः यद्यस्तिदक्षि
णाभावोप्यशक्तौहोमकर्मणि हिरण्यंदक्षिणांदद्यात्तदानीमेववाबुधः २९ वस्त्रकुंभादिसकलंतच्चान्नेप्रतिपादयेत् ब्राह्मणान्
भोजयेच्छक्त्यासुशीलान्वेदपारगान् ८३० भक्ष्यैश्चपायसाद्यैश्चरत्नानिसुबहूनिच अनेनविधिनायस्तुशान्तिं कुर्वीतशक्तितः ३१

तस्यवर्षशतायुष्यंभवत्येवनसंशयः इदंपूर्वंद्विनवतितमश्लोकमारभ्यप्रतिपादितंकिंचिदाधिक्यत्वादत्रापिकथितं ३२
अथरथसप्तम्यांस्वप्नगृहणविधिः मासस्तबकेमाघमाहात्म्ये माघेतुरथसप्तम्यांनारीस्वेष्टफलेप्सया उत्थायपश्चिमेयामे
स्नाताधौताम्बरासती ३३ रथमालिख्यसवितुर्गोष्ठेवृन्दावनेपिवा रथेप्राच्यामष्टदलंपद्ममालिख्यधातुना ३४ सूर्यमण्डलगंविष्णुं
तत्रपद्मे प्रपूजयेत् रक्तैःपुष्पैरक्तमाल्यैरक्तचंदनवाससा ३५ गुग्गुलेनचधूपेनपायसस्योपहारतः ताम्बूलंचततोदद्यान्निद्रांकु
र्यात्ततःपरम् ३६ सूर्यमण्डलगोविष्णुःस्वप्नेवक्तिहिताहितं ददातीष्टांस्तथाकामान्नान्यथेदंक्वचिद्भवेत् ३७ बार्हस्पत्ये क
श्यपोत्रिर्वसिष्ठश्चशाण्डिल्याङ्गभृगुगौतमौ देवलेनभरद्वाजान्माण्डवेनसनातनैः ३८ पराशरेणमुनिनाविश्वामित्रश्चभार्गवान् ऋ
षिप्रणीतशास्त्राणिबार्हस्पत्यमुदीरितम् ३९ चिन्तामणौ येभद्रबाहुसुश्रुतवाचस्पतिचरकरत्नकोशेषु उक्ताःस्वप्नविशेषाः
शुभाशुभास्तेमयाप्युदिताः ८४० एतत्पवित्रंपरमपुण्यदंपापनाशनं यःपठेत्प्रातरुत्थायदुःस्वप्नंतस्यनश्यति ४१ अथग्र
न्थालङ्कारः श्रीमद्वाजसनेयिगौतमकुलोत्पन्नोतिविद्यावतांमान्योगुर्जरपण्डितोपपदकौदीच्यःसहस्राह्वकः ज्योतिःशास्त्र
विशारदोतिमतिमान्श्रीवेंकटाख्योद्विजस्तज्ज्ञोहंहरिकृष्णसंज्ञकइमंचक्रेविदांप्रीतये ४२ दाक्षिणेसुमहाराष्ट्रदेशेचनगरंबृह
त् औरंगाबादसंज्ञंवैतत्रचास्तिजनिर्मम ४३ प्रार्थयेसर्वविदुषांक्षमध्वंमेऽपराधकं यदत्रकुकृतंवास्यादधिकंयत्रकुत्रचित् ४४
रोषमुत्सृज्यतत्सर्वंनिर्मलंकुरुतादरात् अत्रावशिष्टोयोभागःसतुशेषेभविष्यति ८४५ इतिश्रीज्योतिर्वित्कुलावतंसव्येंक
टरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेषष्ठमिश्रस्कंधेस्वप्ननिरूपणंनामस्वप्नमार्तण्डाध्यायोनवमःसमाप्तः॥९॥ ॥
अथाग्रेस्वस्थारिष्टकालज्ञानाध्यायोभविष्यति ॥ ॥

अथस्वप्नमार्तण्डविषयानुक्रमणिका


इत्यनुक्रमणिका

यह पुस्तक निजाम शहर औरंगाबादमें। श्रीगायत्रीमन्दिर विद्याप्रकाश छापखानेमे पछि

॥इतिश्रीबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कन्धेस्वप्नमार्तण्डनिरूपणंनामनवमो-॥

अध्याय: ९ समाप्त: ॥ किंमत ॥।

हरिकृष्ण व्यंकटरामके पास मिलेगा यह पुस्तक रजिष्टर करके सबतरहसे हक्क मालकने पास रखाहै


गोलोक
परब्रह्मस्वरूपं
कृष्ण
राधा
शब्दब्रह्मस्वरूपं
श्रीबटुकभैरवः
ब्रह्मा
सूर्य.
चंद्र
शिव
यजु.
सा.
अ.
विरजा नदी


श्लोकौ ॥ येनामकेचिदिहनः प्रथयंत्यवज्ञां जानंतु ते किमपि तान्प्रति नैष यत्नः ॥ उत्पत्स्यतेऽस्ति मम कोपि समानधर्मा कालोह्ययं निरवधिर्विपुला च पृथ्वी ॥ १ ॥ अर्थः स्फुरंवं कीर्तिरपीह माभूदनर्थ एवास्तु तथापि धीराः ॥ निजप्रतिज्ञामनुरुध्यमाना महोद्यमाः कर्मसमारभंते ॥ २ ॥

अथबृहज्ज्योतिषार्णवांतर्गत षष्ठः मिश्रस्कंधः प्रारभ्यते.

श्लोकौ ॥ ये नाम केचिदिह नः प्रथयंत्यवज्ञां जानंतु ते किमपि तान्प्रति नैष यत्नः ॥ उत्पत्स्यतेऽस्ति मम कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ १ ॥

अथ बृहज्ज्योतिषार्णवांतर्गत षष्ठः मिश्रस्कंधः प्रारभ्यते.

अर्थः स्फुरत्वकीर्तिरपीह माभूदनर्थ एवास्तु तथापि धीराः ॥ निजप्रतिज्ञामनुरुध्यमाना महोद्यमाः कर्मसमारभंते ॥ २ ॥


गोलोक
परब्रह्मस्वरूपं
शब्दब्रह्मस्वरूपं
श्रीबटुकभैरवः
ब्रह्मा
सूर्य.
चंद्र
शिवः
कृष्ण
राधा
यजु.
सा.
भ.
विरजा नदी

अथबृहज्ज्योतिषार्णवषष्ठमिश्रस्कंधाध्यायानुक्रमणिका

इति बृहज्ज्योतिषार्णवे मिश्रस्कंधाध्यायानुक्रमणिका समाप्ता ॥ ॥

विशेषमत्येकज्ञानार्थमनुक्रमणिकातु तत्तदध्यायमध्येविस्तरतथा प्रतिपादिता द्रष्टव्या

श्रीगणेशायनमः आदिनारायणोब्रह्माविष्णुरुद्रादिदेवताः यस्यानुवर्त्तिनस्तस्मैनमोगोलोकवासिने १ संत्वेतदितिशेषः शिष्टास्तावच्छास्त्रारंभे सर्वरं
माहिदोषेण धूमेनाग्निरिवावृताइतिशास्त्रेण सर्वारंभेष्वंतरायप्राप्तौसत्यां धर्मेणपापमपनुदतीतिश्रुतिसिद्धंप्रयोजनमास्थाय स्वस्तिनइंद्रोवृद्धश्रवाइतिश्रुति
लिंगाच्चग्रंथस्यनिष्प्रत्यूहपरिसमाप्त्यैमंगलमाचरंति तस्मान्माध्यंदिनीयोब्राह्मणोहरिकृष्णः श्रीकृष्णप्रसादादेवासमतिर्ज्योतिःशास्त्रस्यषष्ठंमिश्रस्कंधंचिकी
र्षुरशेषप्रत्यूहोपशांतये अभिमतदेवतानमस्कारलक्षणंमंगलमाचरति प्रणम्येति हिमात् हिमालयाज्जाता पार्वतीतत्सुतंपुत्रंगणपतिंसंपूर्णविघ्नान्विशेषेणछे
दयतीतितं सुबुद्धिरेवधनंददातीतिसातांईशंबटुकनाथं गुरुंपितरंज्योतिःशास्त्रप्रवीणंवेंकटरामसंज्ञकंप्रणम्येतिसर्वत्रसंबंधः ततोग्रंथारंभंकरोमीतिशेषः १ पुन
रपीष्टदेवतांप्रणमति स्वस्तीति स्वस्तिश्रीमदितिमंगलशब्दः अहंतमीश्वरंवंदेनमस्करोमीत्यन्वयः कथंभूतंतंअभीष्टंददातीतितंपुनःकीदृशंपरशिवाश

श्रीगणेशायनमः प्रणम्यहिमजासुतंसकलविघ्नविच्छेदकं सुबुद्धिधनदांतथाभगवतीमहंशारदां स्वभीष्टफल
दायकंबटुकनाथमीशंगुरुं ग्रहर्क्षगणसंविदंविबुधवेंकटाख्यंततः १ स्वस्तिश्रीमदभीष्टदंपरशिवाशक्त्यात्मजंभैरवं

क्तिः आदिमहालक्ष्मीस्तस्याःआत्मजंपुत्रं सदाशिवांकमारूढाशक्तिरिच्छाह्वयाशिवामहालक्ष्मीरितिख्यातादेवीसर्वगुणान्वितेतिशिवपुराणात् मार्कंडेयपुरा
णोक्तदुर्गारहस्ये आदिमहालक्ष्मीसकाशादेवलक्ष्मीकालीसरस्वतीनांब्रह्माविष्णुमहेश्वराणांचोत्पत्तिःप्रतिपादिताइत्यनेनाष्टमस्यचतारः ब्रह्मविष्णुशिवैर्निरू
पत्रयेणकार्यपरत्वेनकालइतिद्योतितंवस्यतिच भैरवंभीषणस्वरूपं पुनःकीदृशमितिसंहारस्थितिजन्मकारकमयैस्त्रिभिर्वर्णैः संयुतं कल्पांतेस्वोदरेवि
श्वस्यभरणात् भकारःसंहारवर्णः प्रथमः विश्वस्यरमणात्पालनात् रकारः स्थितिवर्णोद्वितीयः स्वोदरेभरितस्यविश्वस्य पुनर्वमनात् वकारोजन्मकार
कवर्णस्तृतीयः मरवएवभैरवइतिननुरूपत्रयेकिंप्रमाणमित्युक्तेवामनशिवपुराणयोरंधकासुरवधार्थेरुद्रांशावतारोयंभैरवइतिविस्तारेणप्रतिपादितंदृष्ट्वं
तत्रैवविष्वक्शेभैरवमहात्म्येप्रमाणंप्रतिपादितं तत्रत्यं किंचिदत्राह प्रचंडदैत्यैःसहयुद्धेनतेषांसंहारेणच महालक्ष्म्याः क्रोधेप्रदीप्तेतच्छांत्यर्थंब्रह्मादयोनकोपि

समर्थाः विह्वलाः संतः विष्णुं प्रार्थयामासुस्तदा विष्णुर्बटुकरूपः सन् महालक्ष्मीसमीपं गत्वा नृत्यमकरोत् बटुकरूपं नामं कोऽर्थः तदुक्तं तंत्रे बटुश्चाष्टौ
बटुकः साक्षान्नववर्षो गणेश्वर इति वचनात् तदा प्रसन्ना महालक्ष्मीः त्वं को भवान् बटुकः साक्षान्मायावीयेन मोहिता तदा बटुको वाचाहं विष्णुस्त्वत्क्रोधश
मनार्थममुना स्वरूपेणागतः तच्छ्रुत्वा लज्जिता जाता लक्ष्मीः स्वपतिं ज्ञात्वा भैरवो भूतनाथश्चेत्यादि प्रभुर्विष्णुरिति बहिरिस्थं तेनाष्टोत्तरशतनामस्तोत्रेण स्तु
तिमकरोत्तेन प्रसन्नो बटुभैरवः अन्यच्च देवकीगर्भसंजातो देवकीसेवकः कुठुरिति रुद्रयामले बटुसहस्रनामस्तोत्रे चोक्तं ब्रह्मांशावतारे च प्रमाणमुक्तं तत्रै
व जगद्भर्ता जगत्कर्ता वाणीपतिर्विशारद इति पुनः किंभूतं बटुक इति आख्यानामयस्यतं पुनः कीदृशं संसारदुःखनाशकं पुनः कीदृशं कल्पांते दिगि
भारिनाख्यमुदितं कल्पांते ब्रह्मदिनांते दिशां इभादिग्गजाश्चत्वारस्तेषामरिः सांकर्षणो रुद्रस्तस्य नाख्येन मुदितस्तं अथवा कल्पांते ब्रह्मणः शतवर्षांते म
हाकल्पांते दिगिभेन्द्र नाख्यमुदितमिति पाठे दिगिभाः द्वादश दिग्गजास्तेषामिन्द्रः अनंतः तस्य नाख्यं नर्त्तनं तेन मुदितः द्वादश दिग्गजाः के इत्युक्ते चत्वारो दिग्गजाः

संहारस्थितिजन्मकारकमयैर्वर्णैस्त्रिभिः संयुतं वंदे तं बटुकाख्यमीश्वरमहं संसारदुःखापहं कल्पांते दिगिभारिनाख्य
मुदितं श्रीशैवरूपं परं २

लोकालोकपर्वते निवसंति श्रीभागवते प्रसिद्धाः अष्टौ च भूमेरधः अनंतसमीपे भूमिमवष्टभ्य तस्तिष्ठंति तेषां नामानि
चामरकोशे ऐरावतः पुंडरीको वामनः कुमुदोंजनः पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजा इति अनंतस्य नर्त्तनं किमर्थमित्युक्ते भूमिधारणकार्यभारस्यत्याग
योगेनानंदत्वादिति ननु अनंतनर्त्तनेनास्य आनंदः किमर्थमित्युक्ते एवमानंदेन नर्त्तमानस्यानंतस्याप्यहं संहारं करिष्यामीति हर्षितो जातः यतोयं महाभैरवः
तथा चोक्तं ककाशः कसमीरणः कदहनः कापश्च विश्वंभरः कब्रह्मा कजनार्दनः कतरणिः केन्दुश्च देवासुराः कल्पांते भभटनरप्रमुदित श्रीसिद्धयोगीश्व
रो क्रीडानाटकनायको विजयते देवो महाभैरव इति तथा च विष्णुगर्वहरणार्थमपि भैरवावतारो गृहीत इत्युक्तं ब्रह्मवैवर्त्तकृष्णखंडोत्तरभागे नारदं प्रति श्रीनाराय
णेन महाविष्णोरहंकारो बभूव स हसंति च सर्वं मल्लोमकूपेषु विश्वान्येवाहमीश्वरः संहारे भैरवो भूत्वा तं जग्रास सलीलया स्थितो मूर्ध्नि मशेषेण प्रसारं तं चकार सः सर्वात्मा
नं ध्यायमानं स्तुतं भीतं कृपानिधिः तच्छरीरं सुसंपन्नं पुनरेव चकार स इति पुनः कीदृशं श्रीशैवरूपं शिवस्य इदं शैवं श्रिया युक्तं च तत् रूपं यस्य तं विशेषेणाष्ट भैरवेषु द्वितीयांश
स्यैव प्रादुर्भावत्वाच्छैवरूपमित्युक्तं अयं बटुकावतारस्तु विष्णोरंश इति भावः परं श्रेष्ठमिति २.

अथग्रंथकर्त्तुर्ग्रामवर्णनं कर्त्तुंग्रामनामोत्पत्तिमाह यवनाष्टकेति श्रीभागवते कलौ भविष्यन्नृपवर्णनप्रसंगेंनृपंप्रतिश्रीशुकेनोक्तं अष्टौचयवनाभाव्याश्चतुर्द शश्चपुल्कसाः भूयोदशगुरुंडाश्चमौनाएकादशक्षितिमितिवचनात् यवनानामष्टकंतस्य मध्यस्तास्मिन् औरंगजेबनामकः बादशाहः पराक्रमवानासीत् दि- ल्लीदेशाधिपः इंद्रप्रस्थस्यैवाधुनिकंनामदिल्ली देहलीतिया अष्टौयवनाः के इत्यपेक्षायामाह नामानि आदौ शालिवाहनशके ११११ एकादशोत्तरैकादशशतमे वर्षेश्रीतिमिरलिंगनामाभूपतिः तस्यराज्यवर्षाणि ६० ततो बाबरसाह वर्षाणि ५६ हमाउवर्षाणि ५१ ततो अकबरशाहवर्षाणि ५५ जाहांगीरशाहवर्षा णि २२ साहिजाह वर्षाणि ३२ अवरंशाहवर्षाणि ४८ बाहादुरशाहात्मज १२ आल्मगीरबादशाह वर्षाणि ५४ स अवरंगजेबः पूर्वजन्मनि मुकुंदब्रह्मचारित्व

यवनाष्टकमध्येभूदौरंगजेबारव्यवीर्यवान् दिल्लीदेशाधिपःपूर्वंसर्वविद्याविशारदः ३ एकदादिग्जयार्थंयोनि
र्जगामबलान्वितः गत्वावाराणसीक्षेत्रबलंद्रष्टुंदिवौकसां ४ छलंवैकारयामासकृतेविश्वेश्वरंशिवं बोधेश्वरं
कलिकत्तपत्तनंपूर्वदिक्स्थितं ५ रुद्रावर्त्तमध्यदेशेब्रह्मावर्त्तमतःपरं पश्चिमेद्वारकांगत्वासौराष्ट्रेसोमनाथकं
६ ओंकारंत्र्यंबकंदृष्ट्वाशिवालयमथागमत् तत्रघुश्मेश्वरंदेवंनत्वाश्चर्यंव्यलोकयत् ७ तल्लिंगेऽजमुखंदृ-
ष्ट्वाभविष्यज्जन्मसूचकं महाक्रोधेनसंयुक्तस्तृणभारंशिवोपरि ८ कृत्वाग्निंज्वालयामासज्योतिर्लिंगमनोरमं
ततोदेवगिरिंनामदुर्गंत्वरिदुरासदं ९ जेतुंखड्गपुरंगत्वालक्षसैन्येनसंयुतः दुर्गस्थेनततोयुद्धंद्वादशाब्दंचकारह
१० तत्रापिदुर्गंनोजित्वास्वस्थानंगंतुमुद्यतः दुर्गस्थेनतथाचोक्तंयवनेंद्रहशाश्वतं ११

त्मणइति ज्ञानेकस्यचित्पद्यं अमूलत्वादुपेक्षितं ३ अवरंगजेबस्यदिग्जयमाह एकदेति स्पष्टोऽर्थः ४ . ५ ६ ॐकारमिति शिवालयं तन्नामकं क्षेत्रं तत्रक्षेत्रेघुश्मेश्वरनामकंज्योतिर्लिंगंनत्वा ७ दर्पणतुल्येतल्लिंगे भविष्यज्जन्मसूचकंमेषमुखंदृष्ट्वाक्रोधेनतल्लिंगंज्वालयामासेतिद्वितीयेनान्वयः ८ ततो देवगिरिनामकंदुर्गंलोके दौलताबादेतिविख्यातं ९ १० ११ . ७ ७ ७ ७

१२ खड्गपुरं खड्गेश्वरशिवालययुक्तं लघुग्रामंपूर्वंयत् तस्यैवस्वनाम्नाऔरंगाबादेतिबृहन्नगरमकरोत् १३ तन्नगरयाम्यप्रदेशमध्येनामदक्षिणमहादे
शांतर्गत महाराष्ट्रदेशे प्रसिद्धं अथतत्पुरस्याष्टदिक्षुतीर्थक्षेत्राण्याह तत्पुरादित्यष्टाभि: १४ १५ १६ १७ १८ नगरूपंपर्वताकारंपर्वतोपरीत्यर्थ: १९

वसशाधिन्वराजंस्त्वमेतत्सर्वंतवेवहि अन्यस्मैत्वांकृतेवीरंकस्मैदास्यामिनिश्चितं १२ औरंगजेबोपितद्वाक्यं
श्रुत्वाखड्गपुरंमहत् स्वनाम्नानगरंचक्रेह्यौरंगाबादसंज्ञकं १३ याम्यप्रदेशमध्येतद्विख्यातंजगतीतले तत्पुरात्
पूर्वदेशेतुजनमारीतिविश्रुता १४ मनुजै: पूजितादेवीसर्वाभीष्टफलप्रदा स्मशानवासीहनुमानाग्नेयांदिशिसं
स्थित: १५ क्रूरकर्माभिलाषाणांप्रत्यक्षफलदायक: मल्लारिदेवोयाम्यायामस्यास्तेयोजनार्धके १६ प्रतिष्ठान
पुरंक्षेत्रंक्रोशाष्टादशकेस्थितं चंद्रवंशीनृपोयत्रराज्यंचक्रेपुरूरवा: १७ नैर्ऋत्यांगोतमीतीरेसाम्राज्यक्षेत्रमु
त्तमं नृसिंहाधिष्ठितंस्वर्गदायकंयोजनत्रये १८ पश्चिमेच्यवनक्षेत्रंसर्वर्षिगणसेवितं अस्तियोजनमात्रेतुनग
रूपंमनोहरं १९ सद्धामतोदेवगिरिर्दुर्गरूपोविराजते द्वियोजनेचवायव्यांशिवक्षेत्रंतुयत्रवै २० वसतीस्ममहा
देवोघुस्मेशोज्योतिर्लिंगक: उत्तरस्यांक्रोशमात्रेहरस्यक्षेत्रमुत्तमं २१ अथग्रंथकर्तुर्वंशवर्णनं तत्रखड्गपु
रेदीन:श्रीगोतमकुलोद्भव: गुर्जरौदीच्यज्ञातीयोमंछारामाभिधोद्विज: २२ सदानामाचतत्पत्नीततोजा-
त:सुतोमहान् नाम्नाव्यंकटरामेतिज्योति:शास्त्रविशारद: २३

देवगिरिर्महापर्वत: श्रीभागवतस्कंदपुराणयो:प्रसिद्धमाहात्म्य: २० हरस्यक्षेत्रंहरम्बूलंहरसिद्धिक्षेत्रमितिनामद्वयेनविख्यातंब्रह्मपुराणेप्रसिद्धमाहात्म्यं
२१ अथग्रंथकर्तु:प्रपितामहादिपूर्वकंवंशंजातिकुलादिभेदंचाह तस्मिन्निति तत्रखड्गपुरे औरंगाबादनगरेदीन: अल्पार्जववृत्तिर्नचोद्धतइति श्रीगोत
म कुलोद्भव: गोतमगोत्रोद्भव: गुर्जर: गुर्जरदेशब्राह्मण: भाइभट्ट शर्मण:पुत्र:मंछारामनामक: ब्राह्मण:आसीत् २२ मंछारामस्यस्त्रीसदानामकीमंछा

राम नामकः ब्राह्मणः आसीत् २२ मंछारामस्य स्त्री सदानामकी मंछारामपुत्रः व्यंकटरामः ज्योतिःशास्त्रवेत्ता २३ तस्यव्यंकटरामस्यममपितु
र्ममचज्ञातिप्रमाणमुक्तंसिद्धपुरक्षेत्रमाहात्म्ये किमर्थंज्ञातिप्रमाणकथनमित्युक्ते तत्रगोत्रशाखावटंकंचज्ञातिंप्रवरशर्म्मच देवींगणपतिंयस्तंनवजा
नातिवाडवइतिवचनात् औदीच्यसहस्त्रब्राह्मणइतिज्ञातिनामैकं आदौमूलराज्ञा विभागत्रयेणपंडितआचार्यमेहेताइतिगुणत्रयेणयुक्तेभ्यस्त्रीभ्यः
ब्राह्मणेभ्यः सिद्धपुरसमीपस्थं पुष्पादलसंज्ञंग्रामदत्तं तत्रपंडितेत्यवटंकः गौतमांगिरसौतथ्येतिप्रवरत्रयोपेतंगौतमगोत्रं शुक्लयजुर्वेदांतर्गतवाजिमा
ध्यंदिनीशाखा धन्यामाध्यंदिनीशाखासर्वशाखोपयोगिनी धन्यंकात्यायनसूत्रंधन्योयोगीश्वरोमुनिरिति २४ २५ त्रोषस्यरं २६ यः व्यंकटरामः

स्यक प्रकाशेतज्ज्ञातिसत्वेमानंतुकीर्त्तितं ज्ञातिरौदीच्यसाहस्त्रीग्रामंपुष्पदलकं २४ भागत्रययुतंतत्रपण्डितेत्य
वटंककः गोत्रंचगौतमीयंवैशाखामाध्यंदिनीस्मृता २५ महोहरोगणपतिर्देवीचशाकंभरीविका यक्षोवीरेश्वरः
कालभैरवोहस्तशर्मकः २६ इतिकालापकं यश्चक्रेचूर्णिकांस्पष्टांप्रतिश्लोकीतिसंज्ञकां श्रीमद्भागवतशास्त्रस्यस
म्राहकरणायवै २७ मन्माताकमलानामापरोपकरणेरता आसीद्व्यंकटपत्नीसायथालक्ष्मीःश्रियःपतेः २८ शांतवृत्ति
र्हितत्पुत्रोहरिकृष्णेत्यहंततः चक्रेज्योतिर्विदांप्रीत्यैज्योतिषार्णवमुत्तमं २९ बृहद्दूर्णप्रपूर्वंयंस्कंधशाखासमन्वितं क
स्यचक्षसमंदृष्टानान्यत्रस्यादृचिःकश्चिःयद्यपिगुणौघनिलयःखलशैलध्वंसनेजिष्णुः तदपिविमलहृदयांतरसज्जन
लोकस्यदासोस्मि ३१ मद्द्वेषिणोबहवःसंत्य पंडिताःपंडिताःपरे समत्सरास्तथाप्येतान्नाहंद्वेष्मिपरेष्टधीः ३२

२७ मन्माताममग्रंथकर्त्तुर्माता २८ तत्पुत्रोव्यंकटरामपुत्रोहं ततोनामपित्रासह चूर्णिकाकरणानंतरं बृहज्ज्योतिषार्णवं २९ ३० ३१ ग्रंथकर्त्तुः
शांतवृत्तित्वं परोपकारकत्वंचकैमुत्यन्यायेनाह मद्द्वेशोममद्वेषकर्त्तारः समत्सराः मत्सरयुक्ताः परोत्कर्षाऽसहनंमत्सरः तान् द्वेषिणः प्रति
अहंनद्वेष्मि यद्यपि योस्मान्द्वेष्टियंचवयंद्विष्मइतिश्रुतिसिद्धमपि अहंपरेष्टधीः परेषांशत्रूणामिष्टधीर्बुद्धिर्यस्यकिंपुनर्मित्राणामितिइदंपद्यंमदीयग्रा
मस्यजनानभिप्रायेणोक्तंनतुदेशांतरस्थजनानामिति ३२

षण्णांस्पष्टोर्थ: ३३ ३४ ३५ ३६ ३७ ३८ शाके शालिवाहनशके ३९ तस्य बृहज्ज्योतिषार्णवस्य ४० ४१ योगक्षेमोत्तममार्गेणसंख्या

द्रष्टुंनानाविधान्ग्रंथान्ज्ञातुंतद्गुणजालकान् द्विषामपिग्रहेऽसकृत्गत्वायांचामकारषं ३३ अत्यार्जवतयातेभ्यो
ह्यतिसुश्रूतयातथा गुणान्नानाविधान्ग्रह्यग्रंथोऽयंरचितोमहान् ३४ अनेकसेवयाविद्यांतथाद्रव्यव्ययेनच
विद्यांस्वविद्ययाविद्यांगृहीत्वासंग्रहःकृत: ३५ नाभ्यस्तंपाणिनीयंवाकाणादंवहुविस्तरं किंतुकेवलकाव्यस्यबले
नायंनिबंधित: ३६ कुत्रचित्तुमत्कृतिर्ज्ञेयापूर्वग्रंथानुसंमता संमतिश्लोकबाहुल्यात्संक्षेपेणमयाऽकथि ३७ अत्र
कुत्राप्यशुद्धंचेत्क्षंतव्यंपूर्णसज्जनै: शोधनीयंप्रयत्नेनगुणदोषविकित्सकै: ३८ द्विरसमुनिशशांकसंमितशाकेभ
वन्ममोत्पत्ति: त्रिनवमुनिशशांक १७९३ शाकेचायंनिबंधितोग्रंथ: ३९ तस्यतुप्रथम:स्कंध:प्रोक्त:सिद्धांतसंज्ञक:
द्वितीय:संहितासंज्ञोहोरास्कंधस्तृतीयक: ४० चतुर्थस्ताजक:स्कंध:प्रश्नस्कंधश्चपंचम: पंचस्कंधान्पुराकृत्वामि
श्रस्कंधंवदाम्यहं ४१ यत्रनानाविधाविद्या:कौशल्यप्रतिपादका: नृपप्रिया:सभारम्यायोगक्षेमप्रदा:किल ४२
कथिताश्चमहास्कंधेषष्ठेऽस्मिन्मिश्रसंज्ञके अध्यायशतसंयुक्तेपरमाद्भुतसंग्रहे ४३ आर्षमानवसंप्रोक्तोविद्या
रूपोत्रवारिधि: तस्मात्सारांशमादायकिंचित्त्रनिगद्यते ४४ अथाध्यायक्रमंवक्ष्येमिश्रस्कंधस्यचादरात् त-
त्रादौप्रथमाध्याय:स्कंधप्रस्तावनाभिध: ४५ शिवालिखितसंज्ञोवैद्वितीय:परिकीर्तित: चक्रावलिस्तृतीयस्तु
भूबलाख्यश्चतुर्थक:४६मंत्रयंत्रबलंप्रोक्तमध्यायेपंचमेकिल सेनाव्यूहादिरचनाषष्ठेप्रोक्ताथसप्तमे ४७ राज
धर्मोराजनीति:सामुद्रिकमथाष्टके नवमेस्वप्नमार्त्तंड:स्वस्थारिष्टंतत:परं ४८

रपरिक्रमणं ४२ ४३ ४४ ४५ ४६ ४७ ४८

छायापुरुषविज्ञानंधनुर्वेदस्ततःपरं त्रयोदशेतथाऽध्यायेवृक्षायुर्वेदवर्णनं ४९ चतुर्दशेजलज्ञानमुद्गार्गलमीरितं वर्णसंकर
जातीनांविवेकास्तिथिसमिते ५० तथान्यषोडशेऽध्यायेब्राह्मणोत्पत्तिरीरिता अध्यायेसप्तदशकेभद्रानिर्णयउत्तमः ५१ देवता
यंत्रपीठानांनिर्णयोऽष्टादशेस्मृतः एकोनविंशेदेशानांवर्णनंसम्यगीरितं ५२ विंशेक्रीडाप्रभेदाश्चत्वेकविंशेततःपरं पत्रप्रश
स्तिकाप्रोक्तादेशभाषाविमिश्रिताः ५३ देशकालद्रव्यतौल्यपरिभाषाचतुष्टयं द्वाविंशेचततःपश्चाद्गणिताभिधकोशकः ५४
पारसीज्योतिषाध्यायश्चतुर्विंशतिमःस्मृतः भाडलीमतवाक्यानांसंग्रहःपंचविंशके ५५ विवाहव्यवहाराणांषड्विंशेनिर्णयः
स्फुटः मंगलाष्टकनाम्नाचेह्यध्यायःसप्तविंशकः ५६ रत्नानांचपरीक्षाचह्यष्टाविंशतिमेस्मृताः एकोनत्रिंशकेप्रोक्तंधातूत्प
त्तिपरीक्षणम् ५७ पशूनांलक्षणंत्रिंशेपक्षिणांलक्षणंततः द्वात्रिंशेकथितंशास्त्रंसंगीताख्यंविशेषतः ५८ त्रयस्त्रिंशेतथाध्याये
देवतावासनिर्णयः चतुस्त्रिंशेवेदशास्त्रपुराणादिविवेचनं ५९ बालशिक्षोपदेशश्चबालग्रहनिवारणम् सप्तत्रिंशेविवेकश्चविषाध्या
यस्ततःपरं ६० कल्याध्यायस्ततःप्रोक्तोनमस्कारस्ततःपरं आदिदाषाख्यस्ततोध्यायःसत्पदार्थप्रशंसनं ६१ असत्पदार्थानिं
दाचदूषणंभूषणंततः प्रकीर्णकस्तथाध्यायःसमस्याख्यानमेवच ६२ प्रहेलिकादिकंसर्वमपह्नुतियुतस्ततः कूटाख्यानंचत
त्रैवबह्वर्थःश्लोकसंग्रहः ६३ क्रियागुप्तादिकथनंचित्राख्यानमतःपरं अंतर्बहिर्लापिकाचद्विपंचाशत्तमेस्मृता ६४ प्रश्नोत्त
राःसदाचारोजातिवर्णनकंततः धर्माणांवर्णनंचैवपापवृत्तिविवर्णनं ६५ अन्योक्तिसंग्रहाध्यायोभूतविद्याततःपरं प्रोक्तंषष्टि
तमेध्यायेकौतुकानांविवर्णनं ६६ एकषष्टितमेऽध्यायेवर्षचर्यानिरूपणं ऋतुचर्याततःप्रोक्ताजन्मचर्याततःपरं ६७ दिनचर्यात
तःप्रोक्तारात्रिचर्याततःपरं तांबूलवर्णनंचैवगंधयुक्तिनिरूपणं ६८ अष्टषष्टितमेऽध्यायेशयनासनलक्षणम् सौभाग्यकरणाध्या
यःशस्त्रलक्षणकंततः ६९ एकसप्ततिमेऽध्यायेमूर्त्तिलक्षणमीरितं ततोऽग्रेप्रतिमाध्यानंपीठलक्षणमेवच ७० चतुःसप्तति

तमेध्याये छत्रचामरलक्षणं कांदर्पवर्णनंपश्चात्कामशास्त्रस्यसंग्रहः ७१ अध्यायदशकेनेववर्णितोबहुविस्तरः षडशीति
तमेध्यायेदीपलक्षणमीरितं ७२ सप्ताशीतितमेध्यायेदंतकाष्ठस्यलक्ष । अष्टाशीतितमेध्यायेशृंगाररसवर्णनं ७३ ततोहास्य
रसश्चैवकरुणारसएवच ततोवीररसाध्यायोरौद्राध्यायस्ततःपरं ७४ भयानकरसश्चैवचबीभत्साख्यस्ततःपरं अद्भुताख्योर
सश्चैवततःशांतिरसस्यच ७५ कृतंचतुर्भिरध्यायैर्वर्णनंविस्तरेणच ततःशततमेध्यायेनिषेधाविधिनिर्णयाः ७६ वर्णितविस्त
रेणैवसर्वसंशयहारकाः अध्यायशतकेनैवंमिश्रस्कंधस्यसंग्रहः ७७ सम्यगेनंविजानातिनृपपूज्योभवेन्नरः ७८ इति
श्रीज्योतिर्वित्कुलावतंसत्र्यंकररामात्मज हरिकृष्णनिबंधितेबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधेस्कंधप्रस्तावकथनंनामाध्या
यःप्रथमः १ श्रीगणेशायनमः अथशिव लिखिताध्यायः त्रिपुरवधमुहूर्त्तेकेनदृष्टंश्रुतंचसकलमपिचदृष्टं
शंभुनाभूतहेतोः यदिशुभमशुभंवायाद्दशंताद्दशंवासकलमपिसुरेंद्राःसर्वदाचिंतयन्ति १ शिवलिखित मित्येतत्सर्वज्ञेरनु
भाषितं यस्यसंदर्शनादेवज्ञायतेचशुभाशुभं २ श्रीदेव्युवाच अस्त्यंधकोमहादैत्योज्योतिःशास्त्रविशारदः तस्यदेहवि
नाशार्थंवदेदानींमहेश्वर ३ ईश्वरउवाच शृणुदेवीप्रवक्ष्यामिज्ञानंत्रैलोक्यदीपकं ज्योतिःशास्त्रस्ययत्सारंदेवानामपिदु
र्लभं ४ नतिथिर्नचनक्षत्रनयोगोकरणंशशी नशूलंयोगिनीकालोनलग्नंनापिचग्रहाः ५ कुलिकंयमघंटश्चनभद्रानच
शूलकं दग्धादितिथयोनैवनहोरानतमोगुणः ६ व्यतिपातेचसंक्रांतौभद्रायामशुभेदिने शिव लिखितमालोक्यसर्वसिद्धि
प्रजायते ७ राजद्वारेविवाहेचसंग्रामेगमनेषुच वाणिज्यव्यवसायेचविलोक्यंसर्वदाबुधैः ८ कदाचिच्चलतेमेरुःसागराश्च
महीधराः सूर्यःपतेच्चवाभूमौवन्हिर्वाशीततांव्रजेत् ९ निश्चितोवाभवेद्वायुर्नान्यथाशिवभाषितं तत्रादौकथयिष्यामिमुहू
र्त्तानित्रषोडश १० गुणत्रयविभागेनचालनीयास्त्वहर्निशं अथमुहूर्त्तनामानि रौद्रंश्वेतंतथामैत्रंचार्वटंजयदेवकं ११
वैरोचनंचविक्षेपंतुरदेवंतथैवच अभिजिद्रावणंचैवबालवंचाबिभीषणं १२ नंदनंचयमंसौम्यंभगंसावित्रसंज्ञकं अथका

श्रीणि रौद्रेरौद्रंतुकार्यंस्यात्श्वेतेतुगजबंधनं १३ मैत्रेचस्नानदानानिचार्वादिप्रोक्तमौषधं जयदेवेसर्वकार्यमभिषेको
विरोचने १४ तुरदेवेऽस्त्रशस्त्रादिप्रवेशोऽभिजितिस्मृतः रावणेसाधयेद्वैरंयुद्धकार्यंचबालवे १५ बिभीषणेशुभंकार्यंनंदनेयं
त्रसाधनं कार्ययमेमारणंचसौम्येसभाप्रवेशनं १६ भगसंज्ञेस्त्रियःसंगंविद्याभ्यासंसचित्रके अथमुहूर्त्तानांवाराः उदया
द्रौद्रमादित्येमैत्रंसोमेमुहूर्त्तकं १७ जयदेवंभौमवारेतुरदेवंबुधेस्मृतं रावणंगुरुवारेस्याद्भार्गवेचबिभीषणं १८ शनौयममु
हूर्त्तंचघटिकाद्वयसंमितं दिनादौयत्प्रवर्त्तेतरात्र्यादौताद्वितीयकं १९ मुहूर्त्तपरिवर्त्तेनगुणयोगेनचत्रिधा अथघातविचारः
धनुर्मीनकुलीराणांसत्वेनाशंविनिर्दिशेत् २० तुलालिवृषमेषाणांघातोरजसिनिश्चितं कन्यामिथुनासिंहानांकुंभस्यमकरस्य
